Shri Raghunath Temple MSS. Library,
JAMMU

No. ४३८१

Title योगवाति संग्रहः

Author श्री उदय शंकरः

Extent ३४ Age १८४०

Subject योगशास्त्रं

© Dharmartha Trust J&K. Digitized by eGangotri

योगवृत्तिसंग्रहः

धरूटय

4389
F = 84

पूर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

कुण्डली ... [redacted] ... ॥४॥

इति विलसत्

श्रीगणेशाय नमः। अथ योगानुशासनम्। अथशब्दोऽधिकारार्थो योगानुशासनं नाम शास्त्रमधिकृतं बोद्धव्यं। तत्र योगं लक्षयति। योगश्चित्तवृत्तिनिरोधः। चित्तस्यान्तःकरणस्य सत्त्वरज
स्तमः प्रवृत्तिपरिणामरूपयो रजस्तमः सत्त्वपरिणामरूपाणां वृत्तीनां योऽसौ प्रतिलोमपरिणामेन स्वकारणे लयः क्रमात् संप्रज्ञातोऽसंप्रज्ञातश्च योगः। अथ चलयो नाम
न ह्यभावः स्वस्य मारणसंस्कारजनकत्वस्यानुपपत्तेः। [redacted] न ह्यभावः संस्कारजनकः किन्तु जीवनयोनियत्नवद् ... प्रयत्नविशेषश्चित्तनिग्रहरूपो निरोधः। ननु वृत्तिविष
यबोधस्वरूपस्य पुरुषस्य वृत्तिनिरोधे कथं स्थितिरित्यत आह। तदा द्रष्टुः स्वरूपेऽवस्थानं। तदेति सर्ववृत्तीनां च निरोधकाले द्रष्टुश्चिद्रूपस्य स्वाभाविके रूपेऽवस्थितिः कु
सुमापाये स्फटिकस्येवेत्यर्थः। पुरुषस्य चैतन्यमात्रस्वभावो न वृत्तिरूप इति भावः। ननु तर्हि व्युत्थाने पुरुषस्य स्वभावभ्रंशः स्यादित्याशङ्क्याह। वृत्तिसारूप्यमितरत्र। इतरत्र
निरोधेतरे व्युत्थाने वृत्तिसारूप्यं कुसुमलौहित्येन स्फटिकस्येव ... तादात्म्यापन्नवत्तीत्यर्थः। अयं सूत्रार्थः ... एव पुरुषस्य ... वृत्तिसारूप्याद् दुःखभोगरूपः
संसारो वृत्तिनिरोधे च द्रष्टुः स्वनिष्ठं रूपं कैवल्यमतो वृत्तयो निरोद्धव्या इति। इदं च योगस्यावान्तरफलमुक्तं। मुख्यफलं तु संप्रज्ञातयोगस्याध्येयसाक्षात्कारः। संप्रज्ञातयो
गस्य च तत्त्वज्ञानसाध्याविद्यानाशः ... इति। निरोद्धव्यानां वृत्तीनां विभक्तानामाह। वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः। पञ्चावयवाः संसारा सा
पञ्चतय्यः। ताः क्लिष्टा बन्धफलाः रागद्वेषादिक्लेशनिकेतवः। अक्लिष्टाः क्लेशनाशिन्यो मोक्षफलाः सत्त्वपुरुषान्यताख्यातिगोचराः। अत्र द्विधा अपि निरोद्धव्याः। अतः
सर्वोऽपि जन्तुर्दृश्यमानाः प्रमाणादिवृत्तिभिर्ज्ञातार्थेषु रागद्वेषादिना कर्म कृत्वा सुखादिना बध्यते [redacted] तेस्सत्त्वपुरुषान्यताख्यातिगोचराभिरभ्यासवैराग्याभ्यां

© Dharmartha Trust J&K. Digitized by eGangotri

क्लिष्टवृत्तिप्रवाहमध्येजायमानाभिःस्वजन्याक्लिष्टसंस्कारान्निहृष्टैःपुनःपुनरभ्यस्यमानाभिःक्लिष्टसंस्कारनिरोधेनाक्लिष्टवृत्तिप्रवाहंनिरुध्यपरवैराग्येणस्वयमपिनि
रुध्यमानाभिःसंस्कारशेषस्यचित्तस्यप्रलयेऽथोपद्रुःस्वेभ्योविमोच्यते॥५॥पंचवृत्तीरुपदिशति॥प्रमाणवि पर्ययविकल्पनिद्रास्मृतयः।इतोन्यावृत्तिर्नास्तीत्यु
देशास्तत्रस्यफलं॥६॥तच्चप्रमाणवृत्तिंविभजते॥प्रत्यक्षानुमानागमाःप्रमाणानि॥अनधिगताविसंवादिवृत्तिप्रतिबिंबितोबोधःप्रमातत्करणंप्रमाणमितिप्रमाणसा
मिथलाद मान्यलक्षणंप्रकृत्यैवविभागःकृतः।तत्रेंद्रियद्वारास्वतोवामनःसन्निकर्षाज्जायतेयाऽनधिगताविसंवादिनिश्चयरूपावृत्तिःसाप्रत्यक्षंप्रमाणं॥निश्चयत्वंच द्वि
संशयभिन्नत्वेसतिज्ञानत्वं॥अतोनेच्छाकृत्यादिष्वतिव्याप्तिः।अस्यचप्रमाणस्यफलं चिदात्मस्वरूपोबोधः।वृत्तिद्वारेणचित्तदारूढोऽर्थश्चित्तेप्रतिबिंबतेयद्यपिचि
दात्माविभुःतथाप्यर्थाकारायांवृत्तौप्रतिबिंबतीतिविंबःसोऽप्यर्थाकारःसन्नभिसरति (प्रमा) तस्यफलत्वंचेतनपुरुषाश्रितत्वंचघटते॥एवमेवानुमानागमादिजवृत्तीनां
पौरुषेयोबोधएवफलं॥प्रयुक्तार्थप्रत्येककरणव्यापारात्त्वद्वास्याद्विव्यापारवत्वं।व्याप्तिपरामर्शवृत्तिजन्यासाध्यतावच्छेदकनिर्धारणवृत्तिरनुमानं योग्यशब्दजन्या
वृत्तिरागमः।एतेष्वेवप्रमाणेषुपरोक्तागमानुपमानार्थापत्त्यादीनांप्रवेशः।अत्रप्रमात्रादिविभागेवार्त्तिकं॥प्रमाताचेतनःशुद्धःप्रमाणंवृत्तिरेवचः।प्रमाऽर्थाकारवृत्तीनां
विषयोमेयउच्यते॥वृत्तयःसाक्षिभास्याःस्युःकरणस्यानपेक्षणात्॥साक्षाद्दर्शरूपंत्वमासिरसंसारस्यसंमतं॥कूटस्थमविकारेणसाक्षित्वंचापनेजगुरिति॥७॥ १
रूपेण

© Dharmartha Trust J&K. Digitized by eGangotri

विपर्ययं लक्षयति· विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं· विपर्यय इति लक्ष्यनिर्देशः मिथ्याज्ञानमिति लक्षणं· मिथ्येत्यस्य विवरणमतद्रूपप्रतिष्ठमिति· तद्रूपः स्वस्य ना
त्माकारः न तद्रूपोऽतद्रूपो यो विषयस्तत्प्रतिष्ठं तेन विशेष्यकमित्यर्थः। भ्रमस्थले च ज्ञानाकारस्यैव विषये समारोपः। विमृष्टाद्यादि चित्तस्थं न बहिष्ठं कदाचन त्व
भ्रमभ्रमदा धेर्तुस्सैवं सैवानुभूयते भ्रतिकोमस्स्नतेः। चित्तस्थमेव प्रतीयते न बहिष्ठमित्यर्थः। न चक्षोत्रांतिकमत प्रवेशः। नेन तत्रारोपितसत्ताया अप्यनंगीकारादस्मन्मते
उबुद्धिस्थज्ञानाकाररजतस्य शुक्तावारोपे शुक्तिसत्तायास्तत्रारोपेण्याव्यवहारं संज्ञावावगमे न ततो विशेषात्। यदाह भगवान्पंचशिखाचार्यः। सदसत्ख्याति
र्बाधाबाधाभ्यामिति· यावद्विशेषदर्शनमबाधात्सत्वं विशेषदर्शने तु बाधात्तदभाव (बाहिः) इत्यर्थः। संशयस्य तु विपर्यय एवांतर्भावात्तल्लक्षणं पृथग्न कृतं· ८। विकल्पं
लक्षयति· शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः। श्रोत्रेंद्रियेण शब्द[redacted]स्य यज्ज्ञानं तदनु तदनंतरं पतति यादृशार्थाकारं दर्शितं देतितच्छीलस्तछद्गनि स्वरू
पो विकल्प इत्यर्थः। अयं च वस्तुशून्यत्वात्प्रमाणं बाधेप्यवश्यभाविता[redacted]च न विपर्ययः। अस्योदाहरणानि· [redacted] पुरुषस्य चैतन्यं राहोः शिरः वंध्यायाः
पुत्र इत्यादीनि· ९। निद्रां लक्षयति· अभावप्रत्ययालंबना वृत्तिर्निद्रा· कार्यप्रत्ययेति गमनीति प्रत्ययो हेतुरुच्यते· प्रकरणेषु जाग्रत्स्वप्नानामभावस्यानुशादस्मस्यः प्रत्ययः
हेतुभूतं तं नमस्तदालंबनात द्विषयिणी तमः प्रचुरा चित्तविषयापीणी वृत्ति निद्रेत्यर्थः। इतिंद्रियरूणेनुवर्तमानेषु नर्दनियरणं ज्ञानाभावो नेकदिमतनिरासार्थं· ॥ तथा

© Dharmartha Trust J&K. Digitized by eGangotri

दि॰ जायत्स्वभावन्महत्सु परमो वितस्य स्वगतस्तुरवादिविषयापि लीनिश्चलव्यादत्तिरनुमीयते सु नवमस्वाक्षं [redacted] उः नवमस्वा संगा ल्मकोत्स्वाक्षमित्येपम वृत्ति
विधनिश्चेष्टितानांत्रिविधस्मरणाद्वोनिशापिवृत्तिरिति॰ नचतत्रचैतन्यं प्रतिबिंबते॰ गाढतमसो दोषस्य प्रतिबंधकत्वात्॰ नेनिशायामुनीततिमनः प्रवेशात्तु भूतोपा
गादेर्वृत्तिकारणस्याभावः। इंद्रियाधुपरते॰ प्रागेव हिरण्यगर्भस्य [redacted] वृत्त्युत्पत्तेरंगीकारेणालस्यनः संयोगादीनां नत्रकारणत्वस्याकल्पनात्॰ १०॥ स्मृतिं लक्ष
यति॰ अनुभूतविषयासंप्रमोषः स्मृतिः। अनुभूतयोर्विषयो वृत्तितदाकारत्वौ तयोर्नास्ति संप्रमोषः स्तेयमपहारो यस्मात्स [redacted] वृत्तिविशेषः स्मृतिरित्युच्यते॰ न चम
मुष्टतत्ताके पदजन्यपदार्थोपस्थित्यादावव्याप्तिः। तस्यप्रागबोधादि स्वरूपाभ्युपगमादिष्टापत्तेः। एवं च सघटइत्यादितत्तोल्ले खिन्येव वृत्तिः स्मृतिर्यत्र सइति प्रवोपस्थि
तिर्नुपिभासतइति सिद्धांतः। प्रत्यभिज्ञाव्यावृत्तये संस्कारमात्रजन्यत्वं विशेषणीयं॰ सोयमित्येवमात्मिकायाः हि प्रत्यभिज्ञाया इंद्रियसन्निकर्षजत्वात्॰ ११॥ उक्तानां वृत्तीनां नि सत्या
रोधोपायमाह॰ अभ्यासवैराग्याभ्यां तन्निरोधः। क्लिष्टवृत्तीनां विषयाभिमुखत्वलाभंगो वैराग्यसाध्यः। अनभ्यासेतुल्ययविक्षेपस्वभावस्यचित्तस्य वैराग्याद्विक्षेपभंगोनि
शस्यादतउभयोपादानं॰ १२। अभ्यासं व्याचष्टे॰ तत्रस्थितौयत्नोभ्यासः। तत्र (स्वभाव) वृत्तिनिरोधे उपकारकोत्तरवर्त्तमानायास्थितिः रजस्तमोवृत्तिशून्यचित्तैका
ग्र्यंतत्रयः प्रयत्नोयमनियमादिसाधना[illegible]नानां पुनः पुनरनुष्ठानं सोभ्यासइत्यर्थः। १३॥ तस्यैव विशेषमाह॰ सतुदीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः। २

चिरकालंनैरंतर्येणब्रह्मचर्यादिसंस्कारैश्चासेवितोदृढभूमिर्भवतिव्युत्थानसंस्कारेणानभिभूतांस्थितिंजनयतीत्यर्थः।१४।वैराग्यमाह।दृष्टानुश्रविकविषयवितृष्णस्यव
शीकारसंज्ञावैराग्यं।द्विविधोविषयःदृष्टआनुश्रविकश्च।दृष्टइहैवोपलभ्यमानःशब्दादिःअनुश्रूयतेगुरुमुखादित्यनुश्रवोवेदःततआगतोज्ञातआनुश्रवि
कःपारलौकिकः।तयोर्द्वयोरपिविषययोःपरिणामविरसत्वदर्शनाद्विगततृष्णस्यउपभोगपर्यंतोगर्धोयस्य[redacted]तस्यवशीकारसंज्ञाममैतेवश्या
नाहमेतेषांवश्यःससम्प्रयोगइत्येवंयोविमर्शस्तद्वैराग्यमित्युच्यते।१५।तस्यैवविशेषमाह।तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यं।तद्वैराग्यंपरंउत्कृष्टंप्रथ
मंवैराग्यंविषयविषयं।द्वितीयंगुणविषयंउत्पन्नपुरुषविवेकख्यातेरेवभवति।गुणत्रयेहेतुविषयकोक्षुपनात्संस्कारात्स्यमुच्यते।अयमर्थःउत्पन्न
पुरुषविवेकख्यातेर्गुणःपुरुषविवेकख्यातिमात्रंनत्रवैतृष्ण्यमित्यनेनप्रथमवैराग्यंवर्तमानस्यविनाशित्वादिदोषदर्शनसामर्थ्येनपुरुषविवेकख्याति
वलंबुद्धिरविद्या निवृत्तसाध्यप्रयोजनवलात्त्व अर्नेन वैराग्येणत्रिधाविनिवृत्तोप्युक्तदोषदर्शनेनानाल्पछष्याचपुरुषविवेकख्यातावप
लंबुद्धिर्विरक्तोच्यतइति।१६।योगस्यससाधनंस्वरूपंनिरूप्यतस्यसंप्रज्ञातासंप्रज्ञातस्वरूपभेदानन्तरमाह।वितर्कविचारानंदास्मितानुगमात्संप्रज्ञा
तःसाक्षात्कारविशेषरूपैर्वितर्कादिभिरनुगमाद्धेतोःसम्यक्प्रज्ञातत्वेनसंप्रज्ञातनामायोगोभवति।यथालोकेप्राथमिकोधानुष्कःस्थूलमेवलक्ष्यंविध्यतिपश्चात्सू

=प्रथमवैरागोणी:=

© Dhamartha Trust J&K. Digitized by eGangotri

तथा श्रा

क्षंप्राथमिकोयोगीस्थूलमेवमहाभूतेंद्रियालंबनेनसाक्षात्करोतिससाक्षात्कारोवितर्कइत्युच्यतेतदनुगतोयोगःसवितर्कः।तस्यस्थूलस्यकारणंसूक्ष्मंपंचतन्मात्रा
श्रा णितदालंबनेनसाक्षात्कारोविचारउच्यतेतदनुगतोयोगःसविचारः।उभयविधोप्ययंग्राह्यसमापत्तिरितिव्यपदिश्यते।तेषांतन्मात्राणांकारणमहंकारस्तस्यचर
3 जस्तमोलेशानुविद्धांतःकरणसत्वरूपेणालंबने [redacted] साक्षात्कारआनंदउच्यतेतदनुगतोयोगःसानंदः।सोयंग्रहणसमापत्तिः।तस्याहंकारस्यकारणंमहत्त्वं
जस्तमोनभिभूतंशुद्धंसत्वंतदालंबनेनसाक्षात्कारोऽस्मितातदनुगतोयोगःसास्मितः।अयंग्रहीतृसमापत्तिः।अत्रयथाघटज्ञानंघटविषयंतादात्म्यात्तं
थास्थूलयोगःस्थूलसूक्ष्मानंदास्मिताविषयःसूक्ष्मयोगस्त्रयविषयोऽन्योप्येकविषयोऽस्तुचसंप्रज्ञातसमाधिर्लौकिकःक्रमोस्तियत्स्थूलादिक्रमेणै
वपरमसूक्ष्मपर्यंतंचित्तसमाधानमिति।न्यस्यतीश्वरानुग्रहवशादादावेवोत्तरभूमिलाभेननतस्यापूर्वभूमिषुसाक्षात्कारोपेक्षितः।मूलत्वात्साक्षात्कारस्य
घ२ घटोविषयत्ववत्स्मादिसाक्षात्कारेणमूलभूयाविषयकत्वंसिद्धं॥१७॥सोपायमसंप्रज्ञातमाह।विरामप्रत्ययाभ्यासपूर्वःसंस्कारशेषोन्यः।विरम्यतामित्येवंयः
प्रत्ययःप्राग्युक्तवितर्कादिवृत्तिष्वलंबुद्धिःपरवैराग्यंतदभ्यासात्सोनःपुन्याज्ञामतेयःसंस्कारमात्रावशेषोवृत्तिनिरोधःसंसंप्रज्ञातादन्योऽसंप्रज्ञातइत्य
र्थः।संस्कारमात्रशेषइत्यनेनमोक्षकालिकनिरोधव्यावृत्तिः।असंप्रज्ञातेहिव्युत्थानादिवृत्तिसंस्कारमात्रंतिष्ठतिनवृत्तिर्मोक्षेतुचित्तस्यास्तंलययात्संस्कारोपिन ३

© Dharmartha Trust J&K. Digitized by eGangotri

निष्ठतीति विशेषः ॥१८॥ असंप्रज्ञातं द्विधा विभजते स्म आभ्यां भवप्र [redacted] स यो विदेहप्रकृतिलयानां । विदेहानां प्रकृतिलयानां चासंप्रज्ञातो भवप्रत्ययसंज्ञको भवति । भ
वो जन्मैव प्रत्ययः कारणं यस्येति भुसन्ने वित्यर्थः । देहनैरपेक्ष्येणैव बुद्धिवृत्तिमंतः सिद्धा विदेहा इति विभूतिपादे भाष्यकारोक्तेः । ते च महदादयो [redacted] देवा स्तेषां च साधना
नुष्ठानं विनैवासंप्रज्ञातयोगो भवति स्वाभाविकात्मसाक्षात्कारानन्तःपरवैराग्यात् । तथेश्वरोपासनया प्रकृत्युपासनया वा ये ब्रह्माण्डं निवार्य लिंगशरीरेणासते प्रकृत्या साव
रणं गतास्ते च प्रकृतिलीनास्तेषामपि साधनानुष्ठानं विनैव बाह्याविर्भावरूपाज्जन्मन एवासंप्रज्ञातो भवतीत्युक्तं भवतीत्येतोः ॥१९॥ द्वितीयमाह । श्रद्धावीर्यस्मृतिसमाधिप्रज्ञा
त्रितानां पूर्वक इतरेषां । इतरेषां । विदेहप्रकृतिलयातिरिक्तानां उपायजन्य एवासंप्रज्ञातो भवति न तु स्वाभाविक इत्यर्थः । श्रद्धा । आस्तिक्यबुद्ध्या योगोत्कंठा । श्रद्धातश्च वीर्यं धारण
रूपः प्रयत्नो भवति । वीर्याच्च स्मृतिर्ध्यानं । स्मृतेश्च योगचरमांगं समाधिः । ततश्च प्रथमं सालम्बनयोगरूपात्संप्रज्ञातयोगे जायमाने जीवब्रह्माण्यतरविषयसा
क्षात्काररूपा प्रज्ञा जायते । प्रज्ञातश्च परवैराग्यद्वारेणासंप्रज्ञातो भवति ॥२०॥ योग उक्तस्तस्यासन्नत्वे हेतुमाह । तीव्रसंवेगानामासन्नः । तीव्रोतिपटुसंवेगो वैरा
ग्यं तेषां ... विघ्नेरुपेषां मासन्नो योगस्य [redacted] इत्यर्थः ॥२१॥ आसन्नतायास्तारतम्यभाव [redacted] माह । मृदुमध्याधिमात्रत्वात्ततोपि विशेषः । मृदुत्वं शैथिल्यं मध्यत्वमसि
थमधिमात्रत्वमधिकप्रमाणत्वमेभिस्तीव्रसंवेगगततीव्रतादिविशेषैरनुष्ठानभेदैर्विभक्तानांयासन्नतापेक्षयापि विशेष आसन्नतरासन्नतमरूपो भवतीत्यर्थः ॥२२॥
तेषां २

© Dharmartha Trust J&K. Digitized by eGangotri

वा तद्

नवतमभावे साधनांतरमाह· ईश्वरप्रणिधानाद्वा· २३। ईश्वरप्रणिधाने निरूपयितुं प्रथममीश्वरलक्षणमाह· क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः। क्ले
शा अविद्यास्मितारागद्वेषाभिनिवेशा द्वितीयपादे व्याख्येयाः। कर्म धर्माधर्मौ। विपाकाः कर्मफलानि जन्मायुर्भोगाः। आशेरते चित्तभूमाविति आशयाः ज्ञानादिवासनाः एतैरप
रामृष्टः कालत्रयेप्यसावन्येभ्यः पुरुषेभ्यो विशिष्यते यः स ईश्वरः। [redacted] क्लेशादेर्नतः करणधर्मत्वाज्जीवानां नैरपरामृष्टस्तेपि स्वामित्वसंबंधेन परामृष्टा इह विवक्षित इति न
घातिनः। तेहि क्लेशादिफलानां सुखदुःखानां भोक्तृत्वात्क्लेशादिस्वामिनः। २४। ईश्वरे प्रमाणमाह· तत्र निरतिशयं सर्वज्ञबीजं· सर्वज्ञस्य [redacted] बीजमनुमापकं यज्ज्ञानस्य
सातिशयत्वं तत्तत्क्रमेण निरतिशयं विश्रांतमित्यर्थः। अनुमानं चैवं· ज्ञानं क्वचिन्निरतिशयकाष्ठं सातिशयत्वात्परिमाणवदिति· २५। ईश्वरस्यानेनोक्तमैश्वर्यं तस्यानिःसीममाह· स
पूर्वेषामपि गुरुः कालेनानवच्छेदात्· पूर्वेषां हिरण्यगर्भादीनां गुरुर्जनकः पिता उपदेष्टा च· मोक्षलक्षणां विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति श्रुतेः। कालेनानवच्छेदादिति· गोति
परस्त्रिकालादिति श्रुतेः। नयतः कालो निमिषापरः प्रभुरिति स्मृतेश्च· ननु ज्ञानक्रियाशक्तिमत्सनमैश्वर्यं पुरुषस्यापरिणामिनः कथं· उच्यते· अस्तीश्वरस्या
नादिसिद्धः शुद्धसत्वात्मकं चित्तं प्रधानजं निरतिशयज्ञानक्रियाशक्तिमत्· स हि भगवान्संसाराज्जंतूनामुद्धरणेच्छया तच्चित्तमुपादत्ते तद्विना ज्ञानधर्मा
द्युपदेशभक्तानुग्रहयोगात्· न चेच्छां विना चित्तोपादानं न संभवति चित्तोपादानमंतरेण चेच्छेत्यन्योन्याश्रय इति वाच्यं· बीजांकुरवदनादित्वात्सर्गप्रवाहस्य· ४

© Dharmartha Trust J&K. Digitized by eGangotri

त्क स्पष्टं·२ क्ष३ र३

ष्टत्वात्॥ न च तादृशचित्तसत्वे प्रमाणाभावः। स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतेरेव प्रमाणत्वादिति संक्षेपः॥२६॥ ईश्वरं लक्षयित्वा तत्प्रणिधानं लक्षयितुं तस्य नरुस्यसं
ज्ञामाह॥ तस्य वाचकः प्रणवः॥२७॥ प्रणिधानं लक्षयति॥ तज्जपस्तदर्थभावनं॥ प्रणिधानमिति शेषः। जपः उपांशूच्चारणं॥ भावनं चेतसि निवेशनं॥ तथा च श्रुतिः। ओमित्ये
यंत्र तदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितमित्येतदक्षरं परं ब्रह्मेति॥ स्मृतिश्च ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्निति॥२८॥ ईश्वरयोगस्य सांख्ययोगापेक्षयातिशयं वक्तुं फ
यं लांतरमप्याह॥ ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभावश्च॥ प्रतीपं विपरीतमंचति विजानातीति प्रत्यक्। स चासौ चेतनश्च जीवस्तस्याधिगमः साक्षात्कारो भवत्यपि राष्ट्रा
दासन्नतमयोगसमुच्चयः। तथांतरायायोगविघ्नास्तेषामभावश्च भवतीत्यर्थः॥२९॥ अंतरायानाह॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमि
कत्वानवस्थितत्वानि चित्तविक्षेपास्तेंऽतरायाः॥ एतो आध्यादयश्चित्तविक्षेपकास्ते प्रसिद्धा अतोऽन्तराया योगविघ्ना इत्यर्थः। तत्र व्याधिर्धातूनां वातपित्तकफानां वैष
म्यकृतो ज्वरादिः॥ स्त्यानं चित्तस्यालघुत्वेऽपि कर्मण्यता॥ संशयो उभयतोऽनैकसाधने उभयकोटिस्पृग्ज्ञानं॥ प्रमादोऽनवधानं॥ आलस्यं कायचित्तयोर्गुरुत्वादप्र
वृत्तिः। अविरतिर्विषयाभिलाषः। भ्रांतिदर्शनं शुक्त्यादिप्रमितार्थविपरीतनिश्चयः। अलब्धभूमिकत्वं वक्ष्यमाणानां योगभूमीनां साधनानुष्ठानेऽप्यलाभः। अनवस्थितत्वं योग
भूमिलाभेऽपि तद्भ्रंशः॥३०॥ न केवलमेते चित्तस्य विक्षेपकाः एवापि तु दुःखादीनपि कुर्वंतीत्याह॥ दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः॥३१॥ दुःखं चेतो बध्य

© Dharmartha Trust J&K. Digitized by eGangotri

दौर्मनस्यं चित्तचांचल्यं अंगमेजयत्वमंगकंपः श्वासो देहान्तर्बाह्यवायोरनधिकप्रवेशः सलाम निश्चायं प्रश्वासो देहादधिकवायोर्बहिर्निर्गमः एते विक्षेपसहभुवो व्याधाय
व्यवधानेनैव जायंत इत्यर्थः ॥३१॥ सूत्रद्वयोक्तान्तरायाः ईश्वरप्रणिधानान्निवर्तन्त इत्युक्तं न केवलं तु पतञ्जलिः कुत्रचिदेकाग्र्येणाप्येते बलवदभ्यासतो निरसनीया भवं
स्पष्टं तीत्याह तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥३२॥ चित्तस्यासूयादिमलवतो योगानुष्ठानायोगात्तन्मलनिरासाय परिकर्माह मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्या णं
पुण्यविषयाणां भावनातश्चित्तप्रसादनं मैत्री सौहार्दं करुणा निरुपाधिपरदुःखप्रहाणेच्छा मुदिता हर्षः उपेक्षौदासीन्यं सुखादिशब्दाः धर्मिवचनाः तत्र
5 सुखिविषयायां मैत्र्या भावनाच्चित्तप्रसादनमित्यादि यथासंख्येनान्वयः अस्य च प्रसादस्य वक्ष्यमाणसूत्रद्वयोक्तस्य चित्तस्थितेरुपायसहकारित्वे
न परिकर्मत्वं [redacted] अनन्तरसूत्रे वा शब्दस्तु तदुक्तसूत्रोक्त चित्तस्थित्युपायान्तरापेक्षया विकल्पार्थो न तेन तत्सूत्रोक्तप्रसादो न
पायमेव्याप्यपेक्ष्येति मिश्राः राजपक्षपातोप्यत्र वार्त्तिकानुसारिणः एवं सति तृतीयसूत्रस्य वाशब्दवैयर्थ्यमतोऽनन्तरसूत्रस्य वाशब्दस्य [redacted] तत्सूत्रोक्तमे
या व्याप्यपेक्ष्य प्रसादोपायान्तरविकल्पार्थकत्वं तृतीयसूत्रस्य [redacted] वाशब्दस्य त्वेतत्सूत्रोक्तप्रसादे चित्तस्थित्युपायताबोधनद्वारा न त्वपेक्षा चित्तस्थि
त्युपायान्तरबोधकत्वमित्याहुः ॥३३॥ प्रच्छर्दनविधारणाभ्यां वा प्राणस्य प्रच्छर्दनं वमनं रेचनमिति यावत् विधारणं कुंभकः तच्चार्थसिद्धकानन्तरं रेचको न तु पूरकं वि ५

© Dharmartha Trust J&K. Digitized by eGangotri

वरी२

नाविधारणसंभवात्प्राणायामतपास्य भाष्येउक्तत्वाच्च· तथाचैनवयात्सूत्रणगर्भ[redacted]चित्तस्यस्थितिनिर्बंधनीसर्थः मतातनेचित्तप्रसादोभवतीसर्थः। अपरआह·
विधारणाभिस्सूत्रकउच्यते· वसिष्ठसंहितायांनाडीशुद्धमर्थद्वेचकपूरकमात्रस्यापिप्राणायामस्योक्तत्वादिति· ३४। विषयवतीवाप्रवृत्तिरुत्पन्नास्थितिनिबंधनी· अत्रम
नसइतिवाक्यशेषः इतिराजवरनौ· इदानीतन्भाष्यपुस्तकेषुतुसूत्रएवंतथापयर्गे· विषयागंधाद्यः पंचविषयतेनसंलग्नाः सा विषयवतीप्रवृत्तिसाक्षात्कारहक्
पारशक्तिः प्रवृत्ति [redacted] कसंल्लामनसःस्थितिर्निबध्यतेउनयातथाभवतिमनःस्थैर्यकरोतीत्यर्थः। तथाहि· नासाग्रेचित्तंधारयतोदिव्यगंधसाक्षात्कारोभवति स्य कारे
जिह्वाग्रे [redacted] दिव्यरसस्यतालुनिदिव्यरूपस्याजिह्वामध्येदिव्यस्पर्शस्यजिह्वामूलनादशब्दस्येतिभाष्यप्रदर्शितदिशातत्तदिन्द्रियेणतत्तस्मिंस्तस्मिन्दिव्येवि
षयेजायमानःसाक्षात्कारो [redacted]ःस्थालीपुलाकन्यायेनयथाक्तोक्तार्थानदेषपि विश्वासमुत्पादयन्नीश्वरादेरस्मन्तमेलक्ष्योचित्तस्थैर्यायभवतीति· ३५। वि
शोकावाज्योतिष्मती· हृतःमन्नचतुरुपपर्यंतंमनसःस्थितिनिबंधनीतियथायथंलिंगव्यत्ययेनानुषज्यतेबध्यते· अंतःकरणस्यपुरकथसदायोगजसाक्षात्कारहक्
पांर्यंतः शोकनाशकत्वाद्विशोकाज्योतिष्मतीचप्रकेतुधर्मेकाद्विहृत्सासौमनसःस्थितिनिबंधनीत्यर्थः। आत्मसाक्षात्कारेपुनश्चित्तस्थितिः किमर्थमपेक्षितेतिचेत्तत्संभवा
देहेतुपरवैराग्योत्पादनायपरमात्मनिचित्तस्थैर्यायप्रचेतिः ३६। वीतरागविषयंवाचित्तं· वीतोरागोयस्मात्तथाभूतजनकादीनांचित्तंतद्विषयंवायोगिनश्चित्तंस्थितिनि

वा२

इतिश्रीतिमनीसुब्वतेः २

© Dharmartha Trust J&K. Digitized by eGangotri

[redacted] बंधनं भव[redacted] ति विरक्तः [redacted] चित्तस्य भावनया विरक्तं चित्तं द्रढस्थितये भवतीत्यर्थः ॥३७॥ स्वप्ननिद्राज्ञानालंबनं वा ॥ प्रत्यस्तमितबाह्येन्द्रियवृत्तेर्मनोमात्रेणैव य
त्रात्मनो भोक्तृत्वमनुभवः स्वप्नः निद्रा पूर्वोक्ता स्वप्नश्च निद्रा च स्वप्ननिद्रे ते च ते ज्ञाने वृत्ती तयोरन्यतरालंबनं वा चित्तं स्थितिनिबंधनं भव[redacted]ति प्रपंचज्ञाने स्वप्ने दृष्ट्वा संसारिषु सुख
महत्या वा चित्तस्य स्थितिर्भवतीत्यर्थः । तथु[redacted]क्तं दीर्घस्वप्नमिमं विद्धि दीर्घं वा चित्तविभ्रमं दीर्घं वापि मनोराज्यं संसारं रघुनंदनेत्यादि चराचरं लयद्वयमस्तु सममितं पश्यता
किं स्थाप्यवहारेषु न विरक्तं भवेन्मन इत्यादि च ॥३८॥ यथाभिमतध्यानाद्वा ॥ किंबहुना यदेवाभिमतं तद्धि हरिहरहिरण्यगर्भमूर्त्यादिकं तद्देवादौ ध्याये ततोऽपि ध्यानाच्चित्तं सर्वत्रैव
प्रस्थितिकं भवतीत्यर्थः ॥३९॥ एवमनुजायमानायां चित्तस्थितेः किं ज्ञापकमत आह ॥ परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ अस्य चित्तस्य सूक्ष्मे निविशमानस्य [redacted] परमाण्वन्तो वशी
कारोऽप्रतिघातो भवति न क्वचित्परमाणुपर्यन्ते सूक्ष्मविषयेऽस्य मनः प्रतिहन्यते [redacted] । तथा स्थूले निविशमानस्य परमं महत्त्वं येषां ते परममहत्त्वा
आकाशप्रभृतयस्तदन्तो वशीकारो भवति तत्रापि नास्य मनः प्रतिहन्यते सर्वत्रैवास्य स्वातंत्र्यं भवतीत्यर्थः ॥४०॥ एवं चित्तस्थितेरुपाया उक्ताः तज्ज्ञापकश्च वशीकार उक्तः ॥ संप्रति
लब्धस्थितिकस्य चित्तस्य किं विषयः किंरूपश्च संप्रज्ञातो योगो भवतीत्येतदुत्तरं पठति ॥ क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ॥ क्षीण
वृत्तेर्निरूपध्येयातिरिक्तवृत्तेर्निष्पन्नसंप्रज्ञातयोगस्य हेतुगर्भं चैतद्विशेषणम् ॥ समापत्तिः साक्षात्कारस्तन्मयीभाव इत्यनर्थान्तरं तथा चैतच्चित्तस्य स्वत एव सर्वार्थग्रह

6

६

© Dharmartha Trust J&K. Digitized by eGangotri

मापत्तिस्त

समर्थस्य विषयांतरव्यासंगदोषादेव प्रतिबंधो तोद्य संततनिरोधेन प्रतिबंधापगमे सति ग्रहीत्रादिषु ध्येयेषु समापत्तिः साक्षात्कारकरूपा वृत्तिश्चित्तस्य स्वतएव भ
वति सा च तत्स्थतदंजनता रूपा तेषु ग्रहीत्रादिषु स्थितस्य चित्तस्य [redacted] सम्यग्ग्रहीत्राद्याकारतान्यग्भूतं चित्तं विषयस्य भाव्यमानस्यैवोत्कर्षेयथा भवतितत
थेत्यर्थः अत्र दृष्टांतः अभिजातस्येव मणेरिति यथाभिजातस्य स्वभावतो निर्मलस्य मणेः स्फटिकादेर्बाह्यमलापगमे सन्निकृष्टवस्त्वाकारतात्वदित्यर्थः यद्य
पि ग्रहीतृग्रहणग्राह्येष्विति सूत्रे तथापि भूमिकाक्रमवशाद्ग्राह्यग्रहणग्रहीत्वृष्विति बोद्धव्यं यथा प्रथमं पंचभूततत्त्वेकेस्थूलेग्राह्ये सम्यग्नतुतस्मिन्नेव सूक्ष्मे ततो ग्रहणे
सात्विकाहंकारात्मके तदेकरणे ततो ग्रहीतर्यस्मिता [redacted] रूपे केवलस्य पुरुषस्य [redacted] ग्रहीतुर्भाव्यत्वासंभवादुः मचापवितर्कविचारानंदास्मितानुग
मात्संप्रज्ञात इति सूत्रे व्याख्यातश्चतुर्विषयः संप्रज्ञात [redacted] एवं त्रिष्वेकविषयेष्वपि समापत्तिर्बोध्या न तदिष्ट्य रीत्या ग्रहणग्राह्येष्विति विपरीतक्रमोपादानेन भगवा
न्सूत्रकारः सूचितवान् ॥४१॥ सा च समापत्तिर्द्विविधा स्थूलविषया सूक्ष्मविषया च द्विविधापि प्रत्येकं द्विविधा तत्रौक्तम् शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का
सूक्ष्म [redacted] विषयायाः समापत्तेर्वक्ष्यमाणत्वादियं स्थूलसमापत्तिरिति पारिशेष्यलब्धं तत्र शब्दः श्रोत्रेंद्रियग्राह्यो वर्णात्मकः स्फोटो वा अर्थो जात्यादिलक्षणः ज्ञानं स
त्वप्रधाना बुद्धिवृत्तिः विकल्प उक्तलक्षणः तैः संकीर्णा यस्यामेते शब्दादयः परस्परमभेदभ्रमेण भासंते गौरिति शब्दः गौरित्यर्थः गौरितिज्ञानमित्यनेनाकारेण सा

स्थूलविषयायाः

© Dharmartha Trust J&K. Digitized by eGangotri

[redacted]

तस्मादेव२ योयंभावःसोर्थइत्यभेदकल्पनरूपम्

[redacted]गवादिस्थूलसमापत्तिर्विपरीततर्केणयोगात्सवितर्केत्युच्यते·अतएवतत्कालीनयोगःसविकल्पइत्यप्युच्यते·विकल्पसंकीर्णत्वात्·एतादृक
ल्पस्थूलस्यएववचनंनिर्विकल्पकयोगइत्युच्यते·अग्रचमामध्यमेदविकल्पआरोपसामान्योपलक्षकएवमुक्तनसूत्रे पि·४२॥ द्वितीयंभेदमाह·स्मृतिपरिशुद्धौस्वरूपशून्येवा
र्थमात्रनिर्भासानिर्वितर्का·येयंपूर्वसूत्रेसमापत्तिरुक्ताश्रवणमनननिदिध्यासनैःसाजायते·तत्रश्रवणंनामशाब्दजबोधलक्षणंसंकेतस्मरणकार्यमतःसंकेतस्मृति
जन्येषणस्वबोधेपितयोरभेदउपनयमर्थादध्यासते·ततश्चश्रवणकार्यमनननिदिध्यासनेमाधामिकसाक्षात्कारेचभासतेउपनयमौत्पात्·यदानुध्येयावेशव
शात्तस्याविकल्परूपायाःसंकेतस्मृतेःपरिशुद्धिरपगमोभवतिसमापत्तिश्चस्वरूपशून्येवाज्ञायमानाभवतितदाशाब्दज्ञानयोरनुगुणेनाभेदारोपासंभवा
दर्थनिर्भासमात्रधारीराध्येयमात्रावगाहिनीविकल्पशून्यास्थूलसमापत्तिर्निर्वितर्का[redacted]संज्ञेत्यर्थः।इयंचाविद्यालेशेनासंपर्कात्परंप्रत्यक्षमित्युच्यतेपूर्वसूत्रो
क्तात्परंप्रत्यक्षमविद्यालेशसत्वात्·४३॥स्थूलविषयेसमापत्तिद्वैविध्यंप्रदर्श्यसूक्ष्मेविषयेतस्याद्वैविध्यमतिदिशति·एतयैवसविचारानिर्विचाराचसूक्ष्म
विषयाव्याख्याता·एतयैवसवितर्कनिर्वितर्करूपयास्थूलविषयकसमापत्त्यासूक्ष्मविषयासविचारानिर्विचाररूपासमापत्तिर्व्याख्याता·अन्योपरागा
नुपरागाभ्यांअत्रहि[redacted]विकल्पतच्छून्यत्वयोर्नातिदेशः·स्थूलविषयिण्यांनिर्वितर्कायांपूर्वभूमिकायांसत्कल्पस्ययोगात्कविकल्पस्यसूक्ष्मविषयिण्यामुक्त ७

मान्यादित्यर्थः।

© Dharmartha Trust J&K. Digitized by eGangotri

॰ न चैवं सर्वं सर्वं स्वगुणस्योजवो न तत्कृतेसंक्रमो तस्मात् सर्वं सर्वं तन्मात्र विविधोत्तरो न च तन्मात्राणामे पं [redacted] तथा तांदितितलकौसुधांशियाः १८
र्यकान॰

रूपभूमिकायामसंभवादिति· तत्र स्थूलरूपं पंचकार्यं तदुपरागेण सूक्ष्मे समापत्तिः। सविचाराकारेण विचारघटितत्वात्तदुत्तरो सपमानाचकेवलसूक्ष्मविषयिणीति
र्विचारेति विभागः।४४। सूक्ष्मविषयस्यावधिमाह· सूक्ष्मविषयत्वं चालिंगपर्यवसानं· अलिंगा प्रकृतिः तत्र पर्यवसानं समाप्तिर्यस्य तत् नतु पुरुषः सूक्ष्मोनापि पर्वमा
णव एवे सर्थः। ततो महत्वांतरप्रकृतित्वं सूक्ष्मत्वमिति पर्यवसितार्थः। न च जलादिभूतचतुष्टये गतिव्याप्तिः स्वोत्तरभूतेषु भूतानामाधारकारणमात्रत्वात् तन्मात्रा
णामेव भूतोपादानत्वात् अथ प्रकृतिसिद्धांतविरोधस्यान्यथापातात् [redacted]·४५। वितर्कविचारैसादिस्वरूपेण पूर्वं संप्रज्ञातस्यावांतरभेदरएवोक्तेन संप्रज्ञातसा
मान्यं लक्षितमतो यथोक्तसमापत्तानुव्यकार्यं कुर्वन् सबीजसंज्ञापूर्वकं संप्रज्ञातसामान्यलक्षणमाह· ता एव सबीजः समाधिः। ता उक्ताः समापत्तयः सबीजः स
माधिः संप्रज्ञातयोग इत्सर्थः। समापत्तिरूपत्वात् योगस्य समापत्तित्वं कार्यभेदेनोक्तं· समा[redacted]प्राह्यश्वागारिनोचभेदविवक्षयायोगे प्रयुक्तः।४६। अन्य[redacted]समापत्तीनां
मध्ये निर्विचारकाष्ठायाः फलतोऽतिशयमाह· निर्विचारवैशारद्येऽध्यात्मप्रसादः। ध्येयगताशेषविशेषप्रतिबिंबग्राहिणी निश्चलैकाग्रता चित्तस्य वैशारद्यं· निर्विचा
रसमापत्तेरेवं वैशारद्ये सत्यध्यात्ममुक्तिवृत्तेर्नो [redacted] प्रसादो भवति· सम्यग्यथार्थव्यपीभावः। यरूपेण समापत्तिः सा मंदास्य्पेयं· साविच्छेयां [redacted] लार्णपूर्वकं इति
न्यग्भावे आनंदमात्रस्वरूपोपायेन तस्थतदंजनता समापत्तिरिति· यत्तानंदालंबनवृत्तित्वभावाभ्यां सविचारनिर्विचारत्वसोरेवानयोरंतर्भाव इति तदुक्तं· आनंदा

४६

© Dharmartha Trust J&K. Digitized by eGangotri

सालंबा

सत्र

लंबनत्वेनैर्व्वभावेऽवशिष्टस्यानंदमात्रस्याधिष्ठानिरूपत्वेनह्रस्वभावरूपनिर्विचारत्वस्योत्तत्रासंभवात् ॥४७॥ग्रहणसमापत्तेनंतरं तत्कारणालंबनायाग्रहीतृसमापत्तेसा
त्त्विकीसंज्ञामाह॥ऋतंभरातत्रप्रज्ञा॥तत्रचित्तप्रसादेनेतत्रनंतरंयाचितिःसाऋतंभरस्वयमालंबनाविभेदीस्थनंतरासाक्षितास्वात्प्रज्ञोत्पन्नेनेतयाह॥एतेनेर्व्वभावादस्मि
तामात्रबोधोसौप्रकृष्टज्ञानालोकनरूपत्वात्प्रज्ञोत्पत्तुच्यते॥सविचारनिर्विचाररूपत्वमत्रपूर्ववल्लिवसनीयं॥४८॥तत्त्वागमानुमानाभ्यामेवप्रमाणाभ्यामर्पतत्वं यस्मा
मलंतदुत्तरंयोगेनेत्यत्रआह॥श्रुतानुमानाभ्यामन्यविषयाविशेषार्थत्वात्॥सातुयोगजाप्रज्ञाश्रुतानुमानाभ्यामतिरिक्तविषयाविशेषार्थत्वाद्विशेषविषयत्वा
8 दित्यर्थः॥शब्दानुमानेहिसामान्यमात्रविषयकेभवतः सामान्यमात्रविषयेभवतस्तयो सामान्यपुनस्कारेणैवसंकेतग्रहणव्याप्तिग्रहणनतुसंकेतव्याप्त्यनवच्छेदकावि
शेषयोरुक्तयोगजप्रज्ञातुनतथाहिकेसतोऽनधिगताधिगंतत्वाद्योगजप्रज्ञायाःप्रमाणान्तरत्वं॥ननुपुरुषेषुविशेषाणामानाध्यात्मकाकिंविशेषग्रहणेसफलास्यात्तदुच्य
ते॥अंततःस्वस्वोपाधिप्रतिबिंबानामेवातीतानागतवर्त्तमानानां[redacted]नांयोगरूपाणांमुक्तामुक्तसकलपुरुषधर्मान्योन्यविरोधत्वादिति॥४९॥ननुतथापिप्रज्ञोसन्निप
र्यंतंसंप्रज्ञातयोगापेक्षास्तुप्रज्ञोत्पत्त्यनंतरंसंप्रज्ञातपरंपरायांकिंफलमित्याकांक्षायामाह॥तज्जःसंस्कारोऽन्यसंस्कारप्रतिबंधी॥तयासह[redacted]तमसमा
धिप्रज्ञयाजनितःसंप्रज्ञातोऽन्येषांव्युत्थानसंस्काराणांप्रतिबंधीसमसारवत्कार्यविरोधीत्यर्थः॥तथाचोक्तविधप्रज्ञासंस्कारदार्ढ्येनव्युत्थानसंस्काराणामभि ८



© Dharmartha Trust J&K. Digitized by eGangotri

भवातिशयः क्रमेण भवति न तत्र दुःखहेतुर्व्युत्थानसंस्काररूपोपि प्रज्ञाकृतसंस्कारसमाने प्रज्ञायामप्यलंबुध्या सर्ववृत्तिनिरोधरूपोऽसंप्रज्ञातोपि भविष्यतीति संप्रज्ञातपरंपरा
[redacted]भ्याः फलमितिभावः। अनादित्वेपि व्युत्थानसंस्काराणां तत्त्वार्थिनां तत्त्वस्पर्शिभिः प्रज्ञासंस्कारैः प्रतिबंध इति परमार्थः। प्रज्ञासंस्काराणां तु चित्तनाशेनैव नाशेन तु संस्का
रांतरस्य तन्नाशकत्वं कल्पनागौरवात्। संस्काराणां विरोधिसंस्काराभिभावकत्वस्य लोके बहुशो दृष्टत्वात्। संस्कारप्रतिबंधी सुकं ननु तन्नाशक इति बोध्यं। ५०।
सपदिकवं संप्रज्ञातं निरूप्य फलकथनेनासंप्रज्ञातं निरूपयति। तस्यापि निरोधे सर्वनिरोधान्निर्बीजः [redacted] पूर्वपूर्वासंप्रज्ञातेतावत्प्रज्ञैवानिरुध्यते न तत्संस्कारस्ता
वंतस्यैव असंप्रज्ञातपरंपरया तस्यापि प्रज्ञाकृतसंस्कारस्य निरोधे संताभिभवे जायमाने च चरमासंप्रज्ञातो निर्बीजयोगस्य परा काष्ठा भवत्यपुनर्व्युत्थाने सर्वथाः स
र्वनिरोधादिति निर्बीजत्वे हेतुः। यतः प्रज्ञातत्संस्कारश्वासंनविलापितावतो दुःखबीजैः संस्कारादि[illegible]भिः शून्यत्वान्निर्बीज इति। ननु ज्ञानेन प्रारब्धातिरिक्ताखिलक
र्मसमाप्तौ भोगेन च प्रारब्धसमाप्तौ कर्माभावादेवापुनर्जन्मरूपो मोक्षो भविष्यति किमर्थमसंप्रज्ञातेनाखिलसंस्कारोन्मूलनमपेक्षितमिति चेत्। प्रारब्धमप्यति
क्रम्य झटिति मोक्षार्थमित्यवेहि। भोगवासनारूपस्य च संस्कारोद्रिक्तत्वे सति प्रारब्धकर्मणः फलोत्सादो भोगाभावादसत्कल्प इति दिक्। ५१॥ ॥पातंजलानां
सूत्राणामुदयंकरदर्शिते वृत्त्यर्थसंग्रहे पादआद्योऽयं संगतः सतां। ननु ध्यांतिमितो कोपि कोपनेम्रूढाबहूक्तिषु सकलावर्जनेतस्मात्क्षमध्वौंजलिरेष नः॥ ॥तदेवं प्रथ

इति समाप्तः प्रथमो योगपादः॥

© Dharmartha Trust J&K. Digitized by eGangotri

मेपादेसमाहितचित्तस्योक्तमाधिकारिणोयोगारोहणायोग्यस्याभ्यासवैराग्यमेवाक्रियायोगनिरपेक्षाभ्यांयोगनिष्पत्तिं [redacted] प्रतिपाद्यव्युत्थितचित्तस्यबहिर्मुखस्या
पिकथमसौस्वाधीनोभवतीतितत्साधनान्याह· तपःस्वाध्यायेश्वरप्रणिधानानिक्रियायोगः। तपश्चित्तप्रसादाविरोधिशास्त्रोपदिष्टकृच्छ्रादि· जपः प्रणवगायत्र्यादेर् [redacted]।
ईश्वरप्रणिधानंतस्मिन्फलनिरपेक्षतयासर्वकर्मणामर्पणंननुप्रथमपादोक्तंतस्योक्तमाधिकारिणंप्रसेवोनात्यात्· एतानितपःप्रभृतीनिक्रियारूपाणियोगयोग
साधनत्वादित्यर्थः। यद्यपिवक्ष्यमाणयमनियमादयःसर्वेक्रियायोगत्वापित्तेभ्यःसानुकूलमष्टसाधनत्रयंमध्यमाधिकारिणंप्रत्युपदिष्टमतःकेवलेनैते
१ नापितीव्रतरेणयोगेभवतीतिसूचयितुं·१। तस्ययोगोत्पादनेफलमाह· समाधिभावनार्थःक्लेशतनूकरणार्थश्च· क्रियायोगःसतुवर्त्तितः· समाधेश्चित्तैकाग्र्यस्यभाव
नायोत्पादनायक्रियायोगोभवतिक्लेशानांवक्ष्यमाणानांप्रकर्षेणतनूकरणाय [redacted] चभवतिसत्त्वशुद्ध्यादिद्वारेणेत्यर्थः। ननुतत्त्वंचविवेकख्यातिप्रतिब
धकतावच्छेदकत्वात्स्यात्तस्याभावः।२। कियन्तःक्लेशाःकीदृशावेत्यतआह· अविद्यास्मितारागद्वेषाभिनिवेशाः [redacted] क्लेशाः। क्लिश्यन्तेऽनेनक्लेशयन्तीतिवाक्लेशाः। क्लेशा
न्यदुःखनिदानत्वात्तेचाविद्यादयःपंचैवेत्यर्थः।३। अविद्याद्योऽयंप्रकरणीयाःआदौतुस्थूलस्यसूक्ष्माणांसर्वेषामेवक्लेशानांविद्याविरोधेनविधानाश्रयत्वंवक्ष्यमाणानु
पपादयितुमविद्यामूलकत्वमन्यक्लेशानामाह· अविद्याक्षेत्रमुत्तरेषांप्रसुप्ततनुविच्छिन्नोदाराणां· उत्तरेषामस्मितादीनांप्रसुप्तादिभेदेनचतुर्विधानामप्यविद्याक्षेत्रं

चतुर्णां

© Dharmartha Trust J&K. Digitized by eGangotri

वि

प्रसवधर्मिणः यद्यप्यविद्यादिपंचकस्यांतःकरणं प्रसवधर्मित्वं तथाप्यविनाभावरूपेणोपादानसाधर्म्येण च निमित्तकारणस्यापि प्रसवधर्मित्वं गौणं तत्र [redacted] प्रसुप्तितनुता

घदग्धयाऽव्यक्तावस्थयावस्थानं तनुत्वं तु पूर्वसंस्कारव्याख्यानेन विच्छिन्नत्वं चान्यप्रतिबंधप्राबल्याद्व्यंजकसत्त्वेऽपि निरंतरानभिव्यक्तिरतः प्रसुप्तितोऽस्य भेदः। व्यंजकसंबंधेनादि

त्रिजन्मादिबहुकालव्याप्यनभिव्यक्तेरेव प्रसुप्तत्वात् व्यंजकसहकारेणाभिव्यक्तस्य स्वस्वकार्याभिनिर्वर्तकत्वमुदारत्वं ४। क्रमेणाविद्यादीन्क्लेशपंचकेन लक्षयति अ

नित्य नित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। यथासंख्यमनित्यादिचतुष्के नित्यादिचतुष्कबुद्धिरविद्यो[redacted]। इदं चोपलक्षणं नित्यादिचतुष्केऽप्यनित्यादि

२४ चतुष्कबुद्धिर्विद्येत्यर्थः। यदाहुराजा। अतस्मिंस्तत्प्रतिभासो विद्येति विद्यायाः समापन्नलक्षणमिति। यद्यपि शुक्तिरजताद्यविद्या अन्या अपि संति तथापि संसार

कारणत्वाभावात्कृता सांख्ये परिगणनं [redacted] परिगणितास्वप्यनात्मन्यात्मबुद्धिरेव संसारस्य मूलकारणमन्यासां तत्पोषकतया तथा[redacted]त्वात्। अविद्यायाम

तरेव वर्तमानाः स्वयं धीराः पंडितं मन्यमानाः। जंघन्यमानाः परियंति मूढा अंधेनैव नीयमाना यथांधा इति श्रुतेः। त्रिगुणमयः पुमानिति भिन्नदर्शनोपाधिस्कृते नित्यत्वेन। तत्रा

नित्ये नित्यबुद्धिर्यथा। ध्रुवा पृथिवी अमृता देवा इत्यादयः। अशुचौ शुचिबुद्धिः यथा नीरं पवित्रमित्यादि। तथा दुःखे सुखप्रचुरत्वात् दुःखे स्वर्गे जगति सुखबुद्धिस्तथात्वाचुर्यबु

© Dharmartha Trust J&K. Digitized by eGangotri

धि स्तृतीया अविद्या॰ तथा अनात्मनि तत्त्वपर्वुद्धिर्यथा तो आत्मबुद्धिश्चतुर्थी ति॰ ५। दृग्दर्शनशक्त्योरेकात्मतेवास्मिता॰ दृक् पुरुषः दृश्यते अनयेति दर्शनं बुद्धिः प्रलयादौ
फलोपधानं नास्ति तः शक्तिपदं॰ दृक्शक्तेर्दर्शनशक्तेश्चैकात्मतेव धर्मतः स्वरूपतश्चासंतमेकाकारणं [redacted] बुद्धिरस्मिता अहंकार इत्यर्थः अविद्यातश्चास्मितायाः
अयं भेदोयं बुध्यासैवादोषामान्यतो हं बुद्धिर्भेदाभेदस्माहिस्तु कृत इति असंतानभेदाग्रहणात्मा अविद्या अस्मिता तु गयोनरवं रूपमिति॰ ६। सुखानुशयी राग
10 ः। सुखमनुशेते सुखानुशायी॰ सुखज्ञस्य सुखानुस्मृतिपूर्वकः सुखतत्साधनमात्रविषयकगर्द्धस्वरूपः क्लेशो राग इत्यर्थः। मात्रपदाद् विद्याव्यावृत्तिः। ७।
दुःखानुशायी द्वेषः सर्वं पूर्ववत्॰ ८। स्वरसवाही विदुषोपि तथारूढोभिनिवेशः। [redacted] पूर्वजन्मस्य मरणदुःखानुभवजन्यवासनासंपः स्वरसते
न वहतीति स्वरसवाही॰ आपि शक्तस्मृद्धिनमविद्यासंतथेति तत्थरूढः पेनाममाति॰ रूढः प्रसिद्धः। यथा अविदुषस्तथा विदुषोपि स्वरसवाहित्वहेतुना यज्जाती
यः क्लेशो भयारव्यः प्रसिद्धः सोभिनिवेश इत्यर्थः। विदुषामपि मरणत्रासदर्शनं भयमेत्तीति भाष्य॰ ९। क्रियायोगः क्लेशतनूकरणार्थ इत्युक्तं तत्र क्लेशा व्याख्या
ताः। इदानीं तत्कारणस्य फलं क्लेशादावश्चविकुमादोदाहस्य फलमाह॰ ते प्रतिप्रसवहेयाः सूक्ष्माः। ते सूक्ष्माः क्लेशाः ये वासनारूपेणावस्थिता न तु वृत्तिरूपपरि
णतोमीतं ते चैप्रतिप्रसवेन प्रतिलोमपरिणामेन हेयास्त्यक्तव्यास्ते क्लेशाः। धर्मिनाशेनोच्छेतुं शक्यं ते इत्यर्थः। नन्वदग्धबीजकल्पानां सूक्ष्माणामनर्थहेतुत्वा १०
म

© Dharmartha Trust J&K. Digitized by eGangotri

संभवात्तदुच्छेदेन पुरुषार्थ इति चेन्न क्लेशतावच्छेदेन दुःखनिदानत्वस्य क्लमत्वात् क्लेशसामान्याभावत्वेनैव पुरुषार्थतायामभिप्रेतत्वात्॥१०॥ क्लेशानां प्रतिलोमपरि
णामसामग्रीमाह ध्यानहेयास्तद्वृत्तयः। क्रियायोगेन सौक्ष्म्यं प्रापितानां क्लेशानां वृत्तयः पुनर्नवाविर्भवणतया परिणामाः ध्यानेन चित्तैकाग्र्येण हेयाः प्रतिबद्धोत्पत्ति
काः कर्त्तव्याः यावत्क्लेशवासनानामनुसत्ता प्राचीनवासनानामुच्छेदो भवेत्॥११॥ क्लेशानिरूप्य नन्तु कथं तेषां क्लेशत्वमित्याशंकापूर्वकं कर्मतत्फलमूलत्वेन व
न्धकत्वात्तेषां क्लेशत्वमित्याह क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः। क्लेशा रागद्वेषादयो मूलं यत्र सः कर्मणा पाशेरतेऽत्र कर्माशयो धर्माधर्मस्वरूपः
सूक्ष्मः संस्कारः। दृष्टादृष्टे वर्त्तमानभविष्यती जन्मनी ताभ्यां वेदनीयोऽनुभवनीयो भोक्तव्य इति यावत् रागद्वेषादयो दोषाः सर्वेषां तिनिबंधनाः। कार्यो
सस्य भवेदोषः पुण्यापुण्यमिति श्रुतिः। तद्वशादेव सर्वेषां सर्वदेह सुखभवोऽस्तीति कौमेर्लक्षः। तत्र नन्दीश्वरविश्वामित्रप्रभृतीनां वर्त्तमानजन्मन्येव धवादिप्रसा
दाद्धर्मफलभोगः नहुषवंशप्रभृतीनां च महदवज्ञातो भुजंगमपाषाणादेरूपपरिणामेनाधर्मफलभोगः। भविष्यज्जन्मनि भोग्यः स्वर्गनरकादिहेतुर्द्वितीयः प्रायेण
सर्वेषां॥१२॥ अयं च [redacted] क्षीणक्लेशानां नास्तीति वदन्मूर्वकर्मोक्तवेदनीयपदार्थैकदेशं विवरन् व्याचष्टे सति मूले तद्विपाको जात्यायुर्भोगाः। धर्माधर्मरूपे क्लेशे सत्येव ध
र्माधर्मयोर्विपाकः फलं जात्यायुर्भोगरूपं भवति न क्लेशक्षयेपी सर्वः। [redacted] जातिर्जन्म आयुर्जीवनकालः। भोगश्च सुखदुःखभोगात्मकमात्रादिस्थितिः। अत्र विपच्यते इति विपाक

© Dharmartha Trust J&K. Digitized by eGangotri

पदस्युससाफलबोधेपिआरभ्यमाणाणवस्थांविवक्षितं विपाको विकारानंभद्दतिभाष्याद तो निःशेषाविद्याक्षयेपिजीवन्मुक्तानांप्रारब्धभोगउपपद्यते १३ उक्ताभ्यांकर्मत
विपाकाभ्यांआशयाभ्यांक्लेशानांसुखफलंवंधफल[redacted]कमनर्थमाह तेह्लादपरितापफलाःपुण्यापुण्यहेतुत्वात् ते विपाकाः सर्व एव समुद्भिन्नसुखदुःखफलकाः समुद्भि
नपुण्यापुण्यहेतुत्वादित्यर्थः उभयत्रापीतद्वेतद्योगेवक्ष्यविधानात् सुखदुःखयोस्तु फलं सुकथस्यतउपभोगत्वादित्याशंक्यत्वान्नोक्तं गादित्यमनर्थहेतुत्वात्क्लेशानामनु
करणादिक्रमेणेत्याह इतिभयदकार्थः १४ ननु ते दुःखफलादेयाः संतु सुखफलानांतुकुतस्तथात्वं तत्राह परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च सर्वमेव दुः
खंविवेकिनः परिणामश्चतापश्चसंस्कारश्चतान्येवदुःखानि तैः तथागुणानांसत्त्वरजस्तमसांयावृत्तयःसुखदुःखमोहात्मिकास्तासांविरोधात्स्वस्पराभिभाव्याभि
भावकत्वलक्षणात्सर्वंसुखमपिपरिणामजानांविवेकिनःसुखदुःखंनतत्साक्षात्कारवतोदुःखमेवविषयभोगकालेपिनतुदुःखपरामर्शस्यसद्भावात् तथासुख
रागापेक्षयादुःखद्वेषस्यबलवत्त्वात्सुखभोगेपिदुःखरूपतयापर्यवस्यती[redacted]तिभावः तत्रपरिणामोनामविषयस्योपभोगविध्यदन्यथाभावस्तत्सत्त्वमप्यतिविषयभो
गस्सुखमपिदुःखमेवविवेकिनोभवति नाम्नोवर्त्तमानत्वा उपभुज्यमानेसुखसाधनेसुखत्वप्रतिपंथिनंप्रतिवेषवतसंतापस्यत्वनी सत्त्वाद संस्कारोभूतः सतिविष
यभोगनाशेस्वक्षेत्रेनेनसमारब्धःसुखदुःखसाधनेषुप्रवृत्तिनिवृत्तापुनःसुखदुःखस्यजनकः १५ तदेवंमुक्तस्यक्लेशावर्गाधावर्गीयविपाकरायोरविद्याप्रभवत्वादविद्याया ११

स्वाकान्तदुर्लभदुःखाकान्तरसाभिष्वङ्गतारतम्य

कामिनीप्रभृतेः

© Dharmartha Trust J&K. Digitized by eGangotri

यास्थ मिथ्याज्ञानरूपायाः सम्यग्ज्ञानोच्छेद्यत्वात्सम्यग्ज्ञानस्य च ससाधनस्य हेयोपादेयावधारणरूपत्वात्तमाह॥ हेयं दुःखमनागतं॥ अतीतस्य गतत्वाद्वर्तमा
नस्य च साधनानुष्ठानात्प्रागेव वर्तनीयक्षणेन स्थातासाविशेष्यादनागतमेव दुःखं हेयमित्यर्थः॥१६॥ हेयहेतुमाह॥ द्रष्टृदृश्ययोः संयोगो हेयहेतुः॥ द्रष्टा चिद्रूपः पुरु
षो दृश्यं बुद्धितत्त्वं तयोरविवेकख्यातिहेतुको योऽसौ संयोगो भोग्यभोक्तृत्वेन सन्निधानं स हेयस्य दुःखस्य गुणपरिणामरूपस्य संसारस्य हेतुः कारणं तन्निवृ
त्या संसारनिवृत्तिर्भवतीत्यर्थः॥१७॥ द्रष्टृदृश्ययोः संयोग इत्युक्तं तत्र दृश्यस्य स्वरूपं [redacted]माह॥ प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गा
12 र्थं दृश्यं॥ प्रकाशः सत्त्वस्य धर्मः क्रिया प्रवृत्तिरूपा रजसः स्थितिः प्रकाशक्रिययोः प्रतिबंधरूपस्तमसः एतत्त्रयं शीलं स्वभावो यस्य तत्प्रधानत्रयाक्तिं सत्त्वादित्रयं दृश्यमुक्त
षभोग्यत्वेन दृश्यस्य स्वाच्यं॥ प्रलये प्रकाशादिकार्याभावाच्छीलेत्युक्तं॥ सत्त्वादित्रयस्य प्रकाशरूपतायां हेतुगर्भं विशेषणं॥ भूतेन्द्रियात्मकमिति॥ स्थूलसूक्ष्माणां भूता
नां कारणं तेन स्थितिशीलत्वं लब्धं॥ [redacted]स्थूलानां बाह्येन्द्रियाणां दृश्यानां राजसानां सात्त्विकानां च सूक्ष्माणामंतःकरणरूपेंद्रियाणां कारणमित्यनेन क्रियाशील
त्वं प्रकाशशीलत्वं लभ्यते॥ गुणानां स्वरूपसत्ताप्रयोजनमाह॥ भोगापवर्गार्थमिति॥ भोगः कथितलक्षणः अपवर्गो विवेकख्यातिपूर्विका संसारनिवृत्तिः। तौ भोगापवर्गा
वर्थः प्रयोजनं यस्य तत्तथेत्यर्थः॥१८॥ नन्वेवं कारणरूपस्य सत्त्वादिगुणत्रयस्यैव दृश्यत्वं प्रोक्तं न विकाराणामित्यतः पर्वविभयाकार्यकारणभेदतस्तानपि संगृह्णाति॥ वि

तामसानां

© Dharmartha Trust J&K. Digitized by eGangotri

भेवाविशेषलिंगमात्रालिंगानि गुणपर्वाणि॰ महदादिगुणात्मकस्य वस्तुनो विशेषादीनि पर्वाणि पर्वविस्तरवस्थाभेदाः नतुतमोसंतमेवेत्यर्थः॰ तत्र विशिष्यंत इति विशेषाः बा
ह्यगाः कार्यस्वरूपाः षोडशविकारास्ते चैकादशेन्द्रियाणि पंचमहाभूतानि च॰ अविशेषाः कार्यत्वेपि कारणस्वरूपाः पंचतन्मात्राहंकाराः॰ महद्॰ लिंगं महत्तत्वं अलिंगं च साम्या
वस्थेति॰ १९। मध्याभ्यां दृश्यपदार्थो व्याख्यातः। द्रष्टृपदार्थो व्याख्यायते॰ द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः। दृशिमात्रो ज्ञानमात्रस्वरूपो द्रष्टृपदार्थः। तत्स्वभावेप्र
माणमाह॰ शुद्धोपि निर्विकारोपि प्रत्ययं बौद्धवृत्तिजातं तदनुकारी वसन्नयं पश्यति॰ एतेः स्वरूपेण जडत्वेन सामर्थ्यविरहात् सामर्थ्ये वा कर्तृकर्मविरोधानभवाद्येकत्व
नेचाभवस्थानाद्वृत्तिसाक्षितया पुरुषः सिध्यति॰ निर्विकारस्याप्यर्थाकारत्वमनुकारेणोपपादितं॰ एतेन सर्वग्रहणसमर्थाकारतारूपः परिणामः स्वभावो सिद्ध एवालिंग
नः पुरुषस्यापि वृत्तिप्रतिबिंबसाकारतावाच्या सा च वृत्तिप्रतिबिंबरूपत्वे सत्यनुकारितेति॰ २०। उक्तविशेषणेनतरमाह॰ तदर्थ एव दृश्यस्यात्मा॰ तस्य द्रष्टुरर्थः प्रयोजनं
भोगापवर्गावेव प्रयोजनं यस्य स तदर्थः। तथा च द्रष्टुर्भोगापवर्गप्रयोजनकमेव दृश्यस्यात्मा स्वरूपं कार्यकारणात्मकगुणत्रयं न स्वार्थमित्यर्थः। एवं च गुणाः परा
र्थाः संहत्यकारित्वात् शय्यादिवदित्यनुमानेन प्रकृत्यादिभ्योऽतिरिक्तस्य द्रष्टुः सिद्धिरिति भावः। संहत्यकारित्वं च कार्ये सहकारिसापेक्षत्वं॰ २१। ननु पुरुषार्थमेव
चेद्दृश्यं तदा पुरुषस्य मुक्तौ तत्सर्वं नश्येत् स्थितिहेतोः पुरुषार्थस्य भोगस्याभावादिति तत्राह॰ कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्॰ यद्यपि विवेकख्या १२

© Dharmartha Trust J&K. Digitized by eGangotri

निपर्यंतभोगसंपादनात्कमपि कृतार्थं समाप्तभोगं पुरुषं प्रति नष्टं विरतव्यापारमपि सर्वपुरुषसाधारणत्वादन्यान्प्रत्यनष्टं सव्यापारमवतिष्ठते। अतः प्रधानस्य सक
लभोक्तृसाधारणत्वान्न कदापि विनाश एकस्य मुक्तौ सर्वमुक्तिप्रसंगो नास्तीति चोक्तं भवति पुरुषवत् तं च॰२२। द्रष्टृदृश्ये व्याख्याते तयोः कीदृशः संयोगो हेय
[redacted]हेतुरुच्यते॰ स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः। स्वं दृश्यं तस्य शक्तिर्जडत्वेन दृश्यत्वयोग्यता॰ स्वामी पुरुषस्तस्य शक्तिश्चेतनत्वेन द्रष्टृत्वयोग्यतानेच
तयोः प्रत्यर्थकाले स्वस्वरूपं भोग्यत्वभोक्तृत्व लक्षणमुपलभ्यते ततः स्वाद्यादौ तदुपलब्धिहेतुर्यो विलक्षणः संबंधः सहजलक्षणः स संयोग इत्यु
च्यते॰२३। द्रष्टृदृश्ययोः संयोगस्यापि कारणमाह॰ तस्य हेतुरविद्या॰ तस्योक्तलक्षणस्य संयोगस्य हेतुः कारणमविद्या॰ अनात्मन्यात्मबुद्धिरूपा मिथ्याज्ञानवा
सनेत्यर्थः। तस्या एव निवृत्तसंयोगतः प्राक्काले संभवान्नाव्यवहितोक्तत्वाच्च॰२४। एवं हेयं तद्धेतुं चोपपाद्य हानं व्युत्पादयति॰ तदभावात्संयोगाभावो हानं तद्दृशेः
कैवल्यं॰ तस्या अविद्याया अभावात् संयोगोच्छेदात्तत्कार्यस्य संयोगस्य दुःखस्य हेयस्य हेतोरभावो संततनिवृत्तिर्हानं दुःखवासंतोच्छेदाय तदेव दृशेर्निःसपुरु
षस्य पुरुषस्य कैवल्यं [redacted] मोक्ष इत्यर्थः॥२५। अत्राप्युपायमाह॰ विवेकख्यातिरविप्लवा हानोपायः। मिथ्याज्ञानवासनयांतराभिभवो विप्लवस्तद्रहिता विवेक
ख्यातिः प्रकृतिविवेकतः पुरुषसाक्षात्कारो हानस्य मोक्षस्योपायः सवासनाविद्योन्मूलनक्षम इत्यर्थः। ननु तमेव विदित्वातिमृत्युमेतीति श्रुतेर्ज्ञानातिरिक्तस्य मो

© Dharmartha Trust J&K. Digitized by eGangotri

गंग

भावा२ निद्धितीया३

सत्साधनत्वादसंप्रज्ञातयोगः किमर्थमिति चेत् ज्ञानत्वात्तयाज्ञान एवासंप्रज्ञातस्यांतर्भावादित्यभिप्रायात्॥२६॥ विवेकख्यातेरविप्लवस्य [redacted] लक्षणमाह॥ तस्य सप्त
धा प्रांतभूमिः प्रज्ञा॥ तस्य विवेकख्यातिरूपस्य हानोपायस्य प्रांतभूमिकारूपिणी प्रज्ञा योगजसाक्षात्काररूपिणी सप्तप्रकारा भवति॥ तद्यथा॥ हेयं दुःखं मया परिज्ञातं नात्र किंच
पिज्ञातव्यमवशिष्यते इति प्रथमा प्रज्ञा जायते॥ तथा हेयहेतवो विद्याकामकर्मादयो मया मे वाः क्षीणाः न पुनरेषां क्षेतव्यमस्तीति तथा निःपादितो मया विवेकख्यातिरूपो हा
नोपायो नास्य पुनर्निष्पादितव्यमस्तीति तृतीया॥ तथा दुःखहानरूपो मोक्षः स्वयं फलं तच्चासंप्रज्ञातसमाधेः साक्षात्कृतं नेदानीं पुरुषार्थस्यापि ज्ञातव्यमवशिष्यते
इति चतुर्थी॥ एषा प्रज्ञा चतुष्टयी स्वस्य सप्तसमास्य तु भवरूपा॥ मा विनिर्बीजसमाधिकालिकावस्थानुभवरूपा चान्या प्रज्ञा त्रयी॥ यथा समाप्तभोगापवर्गा बुद्धिर्भवि
ष्यतीत्येवमाकारा प्रथमा॥ तथा बुद्धिरूपेण परिणताः सत्वादयो गुणाः स्वकारणे लयमेष्यंतीत्येवमाकारा द्वितीया॥ तथा प्रलीनानां तेषां पुनर्बुद्धिरूपेण परिणामो
न भविष्यतीत्येवमाकारा तृतीयेति॥ एतस्यामवस्थायां गुणसंबंधातीतः पुरुषः स्वरूपमात्रज्योतिरमलः केवली भवति॥२७॥ विवेकख्यातिर्हानोपाय इत्युक्तं त
स्याश्च सत्त्वो निमित्तमाह॥ योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः॥ योगांगानि वक्ष्यमाणानि तेषामनुष्ठानादशुद्धेः क्लेशात्मकवासनायाः क्षये सति ज्ञा
नस्य पृथिव्यादितत्त्वविषयकस्य दीप्तिर्ज्ञानमनेन सात्विकपरिणामो प्रकृतिपुरुषसाक्षात्कारपर्यंतं भवतीत्यर्थः॥२८॥ कानि योगांगानीत्यत आह॥ यमनियमासन १३

13

© Dharmartha Trust J&K. Digitized by eGangotri

प्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि॰ निगदव्याख्यातं॰ २९॥ क्रमेणैषांस्वरूपमाह॰ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाः॥ अहिंसाप्राण्यजिघां
सा॰ सत्यंवाङ्मनसयोर्यथार्थत्वं॰ अस्तेयंपरस्वानपहरणं॰ ब्रह्मचर्यंकामिनीश्रवणकीर्त्तनादित्यागपूर्वकमुपस्थसंयमः॥ अपरिग्रहोदेहयात्रासाधनातिरिक्तभो
गानपेक्षा॰ इत्येतेपंचयमाइत्युच्यंते॰ ३०॥ एतेषांयोगिभिरुपादेयंविशेषमाह॰ जातिदेशकालसमयानवच्छिन्नाः सार्वभौमामहाव्रतं॰ जातिर्ब्राह्मणत्वादिः॥ देशस्ती
र्थादिः॥ कालश्चतुर्दश्यादिः॥ समयोब्राह्मणप्रयोजनादिः॥ एतैश्चतुर्भिरनवच्छिन्नाब्राह्मणंनहनिष्येतीर्थेनहनिष्ये चतुर्दश्यांनहनिष्ये ब्राह्मणप्रयोजनातिरेकेणनहनिष्येइ
त्येभिर्विशेषैरनवच्छिन्ना अनियमिता [redacted] कंचित्कदाचित्कस्मिंश्चिदर्थेनहनिष्यामीत्यादिरूपेणाहिंसासत्यादयःसार्वभौमाःसर्वासुशांतघो
रमूढासुसत्वरजस्तमःपरिणामासुचित्तभूमिषुविदिताःमहाव्रतमित्युच्यंते॰ ३१॥ यमानभिधायनियमानाह॰ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधाना
निनियमाः॥ शौचंमृज्जलादिनाबाह्यंमांतरंचमैत्र्यादिभिश्चित्तमलानांप्रक्षालनं॰ संतोषोदेहयात्रातोऽन्यूनलाभेऽपिमनसोऽकालुष्यं॰ तपआदीनिप्रागेव
व्याख्यातानि॰ पंचैतानिनियमाइत्युच्यंते॰ ३२॥ कथमेषांयोगांगत्वमित्यतआह॰ वितर्कबाधनेप्रतिपक्षभावनं॰ वितर्क्यंतइतिवितर्कावक्ष्यमाणास्तेयमादिबा
धनेक्रियमाणेप्रतिपक्षभावनंकार्यं॰ वितर्कप्रतिपक्षान्यमादीन्भावयेद्यथायोगःसुकरोभवेदेवमेषांयोगांगत्वमुक्तमित्यर्थः॥ ३३॥ येवितर्कायत्नेषांप्रतिपक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

चिंतनं नासुभयमाह· वितर्का हिंसादयः कृतकारितानुमो[redacted]दिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानंतफला इति प्रतिपक्षभावनं· यमनियमविपरी
ता हिंसादयो दशापागव्के वितर्कशब्देन परिभाषिताः ते च कृता वा कारिता वा साधु साध्वित्यनुमोदिता वा स्युस्तथा लोभेन वा क्रोधेन वा मोहेन वा स्युस्तथा मृदवो मध्या
15 अधिप्रमाणा वा स्युः सर्व एव दुःखाज्ञानानंतफलाश्चेत्येवं वितर्कप्रतिपक्षस्य दुःखाज्ञानानंतफलकत्वस्य चिंतनं कुर्यादित्यर्थः दुःखं चाज्ञानं च ते चानंते फलं येषामि
ति विग्रहः [redacted] तत्र लोभो नाम सत्त्वपि स्वसाधने पुनः पुनः त[redacted]ष्णार्द्धः। क्रोधः कृत्याकृत्यविवेकोन्मूलकः प्रज्वलनात्मकश्चित्तधर्मः। मोहो विवेकाभावसामा
पात न्यं· ३४। इदानीमेषामभ्यासात्प्रकर्षं गच्छतामनुनिष्पादित्वात्सिद्धयो यथा भवंति तथा क्रमेण प्रतिपादयितुमाह· अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः। अहिंसा
स्थैर्ये सति तस्याहिंसां भावयतः संनिधौ स्थितानां स्वभावविरोधिनामप्यहिनकुलादीनां परस्परं वैरत्यागो भवति· ३५। सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं
[redacted]तत्संनिधावित्यनुवर्तते· सत्यस्थैर्ये सति तस्य सत्यं भावयतः संनिधौ स्थितानामन्येषां तु वचनमात्रेण क्रियायां यागादिरूपायां फलं स्वर्गादि तदाश्रय
त्वं भवति· ३६। अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं· तस्य तेतावत्समास्य पटकमपि विशिष्टं पेशस्तु वर्तते· स्पष्टोऽर्थः। ३७। ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः। प्रणीतस्येसेव·
ब्रह्मचर्यस्थैर्ये सति तस्य वीर्यं देहेन्द्रियमनःसु प्रकर्षमागच्छति येन स्त्रीयं ज्ञानादि विनयेषु संक्रामयितुं शक्नुयात्· ३८। अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः। अद्वैवं १५

गदेहेंद्रियादिसंघातेन ज्ञानहेतुः संयोगो जन्म तस्य कथंतायाः किंप्रकारतायाः अतीतवर्त्तमानभाविभावस्वरूपायाः संबोधो[redacted]ः साक्षात्कारो ऽपवृत्तिः स्थैर्ये सति भव
ति तस्येत्सेव ॥ ३९ ॥ उक्ता यमसिद्धयः नियमसिद्धय उच्यंते । शौचात्स्वांगजुगुप्सा परैरसंसर्गः । शौचादिति ल्यब्लोपे पंचमी । शौचं प्रतिष्ठाय स्थिरीकृत्य स्वांगे स्वमानी ये ऽशुचि
मपश्यतो जुगुप्सा [redacted] अशुचिस्वभावमिदं शरीरं नात्र एकांतः कर्त्तव्य इत्येवंरूपा भवतीत्यस्येत्सेव । तथा एवं शौचपरस्य कायो ममत्वं न शुध्यतीति किंतु तन्ममत्वस्य प
रस्य कायेषु इति दोषदर्शिनः परैः परशरीरैर्न संसर्गश्च भवतीत्यर्थः ॥ ४० ॥ बाह्यशौचस्य स्थैर्य[redacted]भिधित्सुराह । सत्त्वशुद्धिसौमनस्यैकाग्र्येंद्रियजया
स्येतिचा त्मदर्शनयोग्यत्वानि च । शौचादिति ल्यब्लोपे पंचम्यंतं सत्त्वानुवर्त्तते भवंतीति च वाक्यशेषः । चित्तमलक्षालनरूपं [redacted] शौचं प्रतिष्ठाय स्थितस्य तत्प्रतिष्ठाभावय
तः सत्त्वस्य शुद्धिस्ततश्चेकस्ततः सौमनस्यं स्वाभाविकी प्रीतिस्ततः प्रीतचित्तस्याविक्षेपादैकाग्र्यं ततः इंद्रियजयस्ततस्त्वात्मसाक्षात्कारयोग्यत्वमित्यर्थः ॥ ८१ ॥
संतोषादनुत्तमसुखलाभः पंचमी पूर्ववत् संतोषं प्रतिष्ठाय स्थितस्यानुत्तम[redacted]सुखलाभो भवति यस्य सुखस्य विषयसुखं कलांशो
नापि सम्मं न भवेत् तस्येत्सेव ॥ ४२ ॥ कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः । तपस इति पंचमी पूर्ववत् तपः प्रतिष्ठाय स्थितस्य कायेंद्रिययोः सिद्धिर्भवति अशुद्धिक्ष
यादिति अशुद्धिक्षयस्य ज्ञानता हेतुपंचम्योच्यते अशुद्धिः पापं तमोगुणाश्च कायसिद्धिरणिमाद्या इंद्रियसिद्धिर्दूरश्रवणाद्या विभूतिपादे व्याख्यास्यंते ॥ ४३ ॥ स्वाध्या

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यायादिष्टदेवतासंप्रयोगः। पंचमी पूर्ववत्। स्वाध्यायं प्रतिष्ठायां स्थितस्येष्टदेवतया संप्रयोगः स्पर्शनभाषणादिलक्षणो भवतीतस्येत्येव ॥४४॥ समाधिसिद्धिरीश्वरप्रणिधानात्। पं
चमी प्राग्वत्। ईश्वरप्रणिधानं प्रतिष्ठायां स्थितस्य समाधिसिद्धिर्भवति सर्वकर्मार्पणेन भगवानीश्वरः प्रसन्नः सन्नंतरायान्निहत्य समाधिमुद्बोधयतीतस्येत्येव
॥४५॥ यमनियमाः सहेतवः सिद्धिभिरुक्ताः। आसनमुच्यते। स्थिरसुखमासनं। स्थिरं सुखावहं च यदासनं तद्योगांगमित्यर्थः। आस्यतेऽनेनेत्यासनं तद्द्विविधं बाह्यं
वीरा शारीरं च। तत्र चैलाजिनकुशोत्तरं बाह्यं। शारीरं पद्मस्वस्तिकादीति विशेषः। तत्र पद्मासनं प्रसिद्धं। सव्यमाकुंचितचरणं दक्षिणजंघोर्वंतरे दक्षिणं च सव्योर्वंतरे नि
क्षिपेदिति स्वस्तिकासनं। पादतलेऽषणातले संपुटीकृत्य संपुटोपरि पाणिसंपुटिकां न्यसेदिति वीनासनं। अन्येप्यासनविशेषा हठयोगग्रंथेभ्यो ज्ञेयाः ॥४६॥ आ
सनस्थैर्योपायमाह। प्रयत्नशैथिल्यानंतसमापत्तिभ्यां। स्वाभाविकः प्रयत्नश्चलतादासनविघातकस्तस्य शैथिल्ये सत्युपरमे कृते नासनं निष्पद्यते तथानंते पृथ्वीधारि
णिनागनायके [illegible]न समापत्तिश्चित्तस्य धारणं तया च ॥४७॥ आसनस्थैर्ये सिद्धिमाह। ततो द्वंद्वानभिघातः। तस्यापि पंचमी पूर्ववत्। ततस्तस्मादासनमधिष्ठाय
स्थितस्य द्वंद्वैः शीतोष्णादिभि[illegible]रनभिघातश्चलनाशक्तेः प्रातिकूल्येन द्वंद्वैरभावो भवतीत्यर्थः ॥४८॥ क्रमप्राप्तं प्राणायाममाह। तस्मिन् सति श्वासप्रश्वासयोर्गति
विच्छेदः प्राणायामः। तस्मिन्नासने सति श्वासप्रश्वासयोः शोन्मोकनीत्यास्वाभाविकगतिविच्छेदः प्राणायाम इति वक्ष्यमाणं चतुर्विधं प्राणायामं संमया



15

© Dharmartha Trust J&K. Digitized by eGangotri

त्यलक्षणं·तत्रासनस्यांगत्वलाभार्थं सत्सं तं·श्वासप्रश्वासौ रेचनाख्यपुटेन वायोः प्रवेशनिर्गमौ लोके प्रसिद्धौ न काले यास्वाभाविकी प्रवृत्तिस्तत्प्रतिषेध इत्यर्थः। अ
तोन श्वासप्रश्वासयोर्गत्यनुपपत्ति दोषः।४९। अवांतरभेदानाह·बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः। प्राणायामस्त्रिविधः। बाह्य
वृत्तिराभ्यंतरवृत्तिः स्तंभवृत्तिरिति· तत्र कोष्ठस्य वायोर्रेचनेन बहिरेव धारणमाद्यो रेचकसंज्ञकः। बाह्यस्य वायोः पूरणेनांतर्गतस्यांतरेव धारणमभ्यंतरवृ
त्तिः स च पूरकः। रेचनपूरणप्रयत्नं विना प्राणस्य केवलविधारकप्रयत्नेन गतिविच्छेदः स्तंभवृत्तिः स च कुंभकः। नायं रेचकोंतःस्थत्वात्·नापि पूरकः। तप्ताधि
गताग्निहितजलबिंदुवच्छरीरे प्राणस्य संकुचितत्वेन सूक्ष्मतात्·यो हि स्थूलोंतर्निकृष्य देहं पूरयन् रयाति स पूरकः। तस्माद्रेचकपूरकाभ्यासेन विनास्य
कृत्स्नपलमात्रेण सूक्ष्मतमस्य प्राणस्य कुंभमाद्धित घटजलवन्निश्चलत्वेन देहेवस्थानात् कुंभकत्वमस्य·त्रिविधोप्ययं देशकालसंख्याभि[redacted]र्यदा परिदृ
ष्टो निर्णीतो नियमितो भवति तदाभ्यासवशात्क्रमेण दीर्घसूक्ष्मसंज्ञो भवतीति वाक्यार्थः। एतावति देशे नैतावता कालेन वा एतावतीभिर्मात्रासंख्याभिर्वा परि
च्छिन्नो मया रेचकादिः कर्तव्य इ[redacted]सेवमवधारितत्वं तत्र परिदृष्टत्वं तद्विशेषणार्थः। तत्र नासाग्राद्देशाद्वादशांगुलहस्तादिपरिमितो बाह्यदेशो रेचकस्य
विषयः प्राणानुसारात्सचेषीकात्तूलक्रियया निश्चेयः। पूरकस्यापादतलमस्तकमाभ्यंतरो विषयः स च पिपीलिकास्पर्शसदृशेन स्पर्शेन निश्चेयः। कुंभकस्य

© Dharmartha Trust J&K. Digitized by eGangotri

16

इमकदेशस्वविषयः त्रयाणामप्यनुष्ठाने पूरककानंतरं कुंभकस्मरणात् सच नत्वक्रियपयोन्नस्पर्शस्यानुपलब्ध्या निश्चेयः एवं देशपरिदृष्ट उक्तः कालपरिदृष्टस्तु
क्षणगणनया ज्ञेयः संख्यापरिदृष्टोपि मात्रागणनया स्वजानुमण्डलं पाणिना त्रिः परामृश्य छोटिकावच्छिन्नः कालो मात्रा सा हि स्वस्थस्य पुंसः श्वासप्रश्वासाभ्यां मिता
मात्राभिः [illegible] ङ्गिंशन्मात्राभिर्दीर्घ इति परिदृश्यते अधिककालव्यापितं प्राणनिरोधस्य दीर्घत्वं यथायथा दीर्घ इति परिदृश्यते तथाभ्यासप्राणस्य सूक्ष्मत्वेन
नादीर्घ एव परमनैपुण्यात्सूक्ष्म इति परिदृश्यते न तु मन्दतयेत्यर्थः ॥५०॥ केवलकुंभकरूपं प्राणायामस्य चतुर्थं भेदमाह बाह्याभ्यंतरविषयाक्षेपी चतुर्थः बाह्याभ्यंत
रविषयौ बाह्याभ्यंतरवृत्ती पूर्वसूत्रोक्तौ रेचकपूरकौ तयोराक्षेपी अतिक्रामी तावतिक्रम्य केवलो आयत इति यावत् पूर्वसूत्रोक्तरेचकादित्रयापेक्षया चतुर्थः प्रा
णायाम इत्यर्थः उक्तं च वासिष्ठसंहितायां रेचकं पूरकं सम्यक् सुक्त्वा वायुधारणं प्राणायामो यमित्युक्तः स वै केवलकुंभकः ॥ सहितं केवलं वापि कुंभकं नित्यमभ्यसे
त् यावत्केवलसिद्धिः स्यात्तावत्सहितमभ्यसेत् केवले कुंभके सिद्धे रेचपूरकवर्जिते न तस्य दुर्लभं किंचित् त्रिषु लोकेषु विद्यते इति ॥५१॥ योगस्यहायनंतरं प्राणायाम
स्य सिद्धिमाह द्वाभ्यां ततः क्षीयते प्रकाशावरणं प्रकाशोपपंचमीभाग्वत् ततः प्राणायामप्रतिष्ठायां स्थितस्य योगिनः प्रकाशो विवेकज्ञानस्यावरकं कर्म [illegible] पक्षी
यत इत्यर्थः ॥५२॥ धारणासु च योग्यता मनसः प्रकाशावरणक्षये सति मनसो वक्ष्यमाणधारणासु क्षमता भवति ॥५३॥ क्रमागतं प्रत्याहारं लक्षयति स्वविषयासंप्रयो ९६

© Dharmartha Trust J&K. Digitized by eGangotri

गे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहारः॥ इंद्रियाणां स्वस्वविषयासन्निकर्षकाले ध्यानादौ याचित्ताकारानुकारिता भवति सा प्रत्याहार इति फलद्वारकं लक्ष
णं॥ अजितेंद्रियाणां तु ध्यानादिकाले चित्तमेवेंद्रियानुकारि भवति तदनाम पि रूपादिभिश्चित्ताकर्षणादिति॥ इंद्रियाणां विषयस्य त्यागेन चित्ताभिमुखत्वेनावस्थानमिति
ध्येनार्थः इव शब्दः॥५४॥ योगे व्यापारभूतामेव प्रत्याहारस्यासिद्धिमाह॥ ततः परमा वश्यतेंद्रियाणां॥ पंचमी सार्वविभक्तिका॥ ततः प्रत्याहारं प्रतिष्ठाय स्थितस्य या
नींद्रियाणि तेषां परमो जयो भवति॥ चित्तात्वात् श्रेणस्य सभाव एव चरमजय इत्युच्यते॥५५॥ पातंजलानां सूत्राणां मुद्दर्यं कनदर्शिते इत्यर्थे संग्रहेण द्वि
तीयः संगतो गतः॥ नत्वोदयंति मितोतत्त्वेक पदेरूढा बहूक्तिषु सकलावर्जनेतस्मात्समर्पयांजलिरेषनः॥ इति साधनपादो द्वितीयः समाप्तः॥ तदेवं द्वितीय
पादे क्लेशतनूकरणद्वारा योगसाधनं क्रियायोगं निरूप्य सप्रपंचं क्लेशकर्मविपाकानुस्तानेषां हेयत्वार्थं दुःखत्वं दर्शयित्वा हेयतद्धेतु मोक्षतद्धेतूनुपन्यस्य यो
गस्य बहिरंगं यमादिपंचकमवांतरफलसहितं निरूप्य संप्रति धारणादित्रितयमंतरंगं संयमसंज्ञं वदन् संयमसाध्या विभूतयः प्रासाकाराः कैवल्यफ
लके योगप्रवृत्तिहेतवो वक्तव्या इति पादांतरमारभमाणो धारणां तावदाह॥ देशबंधश्चित्तस्य धारणा॥ देशे हृदयोदरनादिरूपे बंधः ऐकाग्र्यं यत् चित्तस्य सा धारणे
त्यर्थः॥१॥ क्रमागतं ध्यानं लक्षयति॥ तत्र प्रत्ययैकतानता ध्यानं॥ तत्र तस्मिन्देशे ध्येयत्वचित्तैध्यतं तत्र प्रत्ययस्य ज्ञानस्य या एकतानता विसदृशपरिणामपरिहारेण वा

© Dharmartha Trust J&K. Digitized by eGangotri

रणायदेवधारणामालंबनीकृतं तदालंबन नयैव निरंतरमुत्पत्तिः सा ध्यानमित्यर्थः।२। समाधिमाह। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। मात्रपद
स्य विवरणं स्वरूपशून्यमिवेति। इवशब्देन ध्यानस्य समतां द्योतयति। यथा स्वच्छस्फटिकमणिः कुसुमरूपेणैवभासते तद्वदित्यर्थः। विजातीयवृत्त्यविच्छिन्नाधार
णा अविच्छिन्नं ध्यानं ध्येयध्यानध्यातृविभागरहितध्येयमात्राकारता समाधिः। स एव दीर्घकालव्यापी संप्रज्ञातो ध्येयस्य निःशून्यो ऽसंप्रज्ञात इति विवेकः।३।
धारणादित्रयस्य व्यवहारलाघवाय तांत्रिकीं संज्ञामाह। त्रयमेकत्र संयमः। एकविषयं त्रयं संयमसंज्ञं स्यादि।४। संयमसिद्धयोऽग्रे वक्ष्यंते इदानीं संयम
स्य योगांगतामयोजकत्वमाह। तज्जयात्प्रज्ञालोकः। तस्य संयमस्य जयात्स्थैर्यात्प्रज्ञायाः [redacted] समाधिजभ्याः आलोको नैर्मल्यं भवति भ्रांतिसंशयादिमल
शे शून्या ध्येयतत्त्वस्फूर्तिर्भवतीत्यर्थः।५। संयमस्यानुष्ठानेऽक्रममाह। तस्य भूमिषु विनियोगः। स्थूलसूक्ष्मादिषूक्ताः सवितर्कनिर्वितर्कसविचारनिर्विचारादयः सं
प्रज्ञातयोगावस्था एव भूमयस्तासु संयमस्य विनियोगः संयमेन पूर्वभूमिकाजयानंतरमुत्तरभूमिकासु विनियोजनं कार्यमित्यर्थः।६। ननु योगांगानामष्टां
गपंचकं पूर्वपादे निरूपितं त्रयमत्र निरूप्यते तत्र को हेतुस्तत्राह। त्रयमंतरंगं पूर्वेभ्यः। उत्तरसूत्रात्तु वेधादिसंप्रज्ञातावस्था विशेषलाभः। तत्र समाधिप्रतिब
धकस्य चित्तकायप्राणेंद्रियमलनिवृत्तिद्वारा यमादिपंचकस्य बहिरंगत्वं धारणादित्रयस्यांतरंगत्वं समानविषयतया साक्षात्स्वरूपोपकारकत्वादंतरंगत्वमिति।



© Dharmartha Trust J&K. Digitized by eGangotri

बोध्यं॥७॥तदपि बहिरंगं निर्बीजस्य॥ निर्बीजोऽसंप्रज्ञातः अस्य धारणादित्रयमपि बहिरंगमेव भवति। विवेकख्यातिपरवैराग्यद्वारा परं पर्यैवतद्धेतुत्वेन तज्जन्मांतरीयाणामपि
प्रज्ञातसंभवादित्यर्थः॥८॥ व्याख्यातानि योगांगानि संप्रति योगांगसमाधेरंगिनोश्च योगयोः स्वरूपभेदावधारणाय तत्तदवस्थासु विशेषा वक्तव्यास्तावतैव तयोरंगांगि
नोः प्रयोजनमपि प्रतिपादितं भविष्यति। तत्रादावंगसमाध्यवस्थानां गियोगयोरवस्थायां विशेषमाह॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोध
क्षणचित्तान्वयो निरोधपरिणामः॥ व्युत्थानं निरोधश्च योगद्वयसाधारणमेवात्र यास केवलं तस्यासंप्रज्ञातस्य ग्रहणे संप्रज्ञातकालीकपरिणामाकथनान्न्यूनताप्रसंगाद्व्यु
अभिभवप्रादुर्भावौ च ह्रासवृद्धी। तथा च व्युत्थानसंस्कारस्य ह्रासो वृद्धिर्निरोधसंस्कारस्य हि वृद्धिर्निरोधकालिकः परिणामः स च निरोधक्षणचित्तान्वयः निरोधस्य सर्वक्षणेषु
चित्तान्वयश्चित्तमात्रान्वयविषयव्यतिरेकेण तदन्वय इत्यर्थः॥९॥ ननु वृत्तीनामेव स्मृतिहेतुतया संस्कारजनकत्वमस्ति निरोधस्य तु संस्कारजनकत्वे किंप्र
माणं तत्राह॥ तस्य प्रशांतवाहिता संस्कारात्॥ तस्य निरोधस्य प्रशांतवाहिता निश्चलप्रवाहः स च संस्काराद्देव भवतीत्यर्थः। परिहृतविक्षेपतयैव चित्तस्य वृत्तिवि
शेषो निरोध इति भावः॥१०॥ अंगसमाधेरवस्थाविशेषमाह॥ सर्वार्थतैकाग्रतयोः क्षयोदयौ समाधिपरिणामः॥ सर्वार्थता विक्षिप्तता [redacted] तत्साः क्षयस्तिरस्का

© Dharmartha Trust J&K. Digitized by eGangotri

र एकाग्रतायास्त्वाविर्भावो यस्तो [redacted] समाधिपरिणामः समाधिकालीनस्य चित्तस्य परिणाम इत्यर्थः ॥११॥ अंगसमाधेरेवोक्तपरिणामानंतरकालिकं परिणामांतरमाह ॥ शांतो
दितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ शांतोऽतीतः उदितो वर्त्तमानस्तावेकविषयत्वेन तुल्यौ प्रत्ययौ चित्तस्यैकाग्रताकालिकः परिणामः ॥ नैरंतर्येण द्वाविषयं चित्तस्यै
काग्रताख्यः परिणाम इत्यर्थः ॥१२॥ चित्तपरिणामेषु निरोधसमाध्येकाग्रतारूपेषूक्तन्यायमन्यत्रातिदिशति ॥ एतेन भूतेंद्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥
18 एतेन चित्तस्य परिणामेन भूतेषु पृथिव्यादिधर्मिषु चक्षुरादींद्रियेषु च धर्मपरिणामो लक्षणपरिणामोऽवस्थापरिणामश्चेति त्रिविधाः परिणामा व्याख्याता भवंति ॥ एतैः
परिणामैः क्षणमपि न किंचिज्जडवस्त्ववतिष्ठत इत्यर्थः ॥ परिणामश्चान्यथात्वं ॥ तत्र धर्मिणो धर्मैः परिणामो यथा मृद्धर्मिणः पिंडरूपधर्मापाये घटधर्मोत्पत्तिः ॥
धर्माणां च लक्षणपरिणामो यथा ॥ पिंडस्य वर्त्तमानलक्षणापाये [redacted] तीतलक्षणोत्पत्तिः ॥ घटस्य चानागतलक्षणापाये वर्त्तमानलक्षणोत्पत्तिः ॥ अनागतवर्त्तमाना
तीतावस्थासु चतांत्रिकी लक्षणपरिभाषा लक्षयति कार्यरूपं धर्ममावर्त्तयतीति योगाच्च ॥ लक्षणानां चावस्थापरिणामो यथा ॥ वर्त्तमानलक्षण एव घटः प्रतिक्षणं नवपुरा ज
णाद्यवस्थाभिरन्यथात्वमेति ॥ यद्यपि सर्व एव परिणामास्तत्तो धर्मिण एव धर्मातीतानां [redacted] परमार्थतो धर्मिस्वरूपत्वात्तथापि भावनादिकावांतररूपैरीदृशोऽपि व



© Dharmartha Trust J&K. Digitized by eGangotri

भागउच्यते ।१३। स्यादेतत् नास्तु धर्मातिरिक्तो धर्मी प्रमाणाभावात् तत्तस्य धर्मादिः परिणामः स्यादिति बौद्धः प्रत्यवतिष्ठते तन्निराकुर्वन्धर्मेभ्यो विवेकतो धर्मिणं साध
यति । शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी । शांता अतीता उदिता वर्तमाना अव्यपदेश्याः शक्तिरूपेण स्थिता अनागतास्तेषु धर्मेष्वनुपाती वर्तमान
रूपेणानुगतो य ः स धर्मीत्यर्थः ।१४। स्यादेतत् अस्तु धर्मेभ्योऽतिरिक्तो धर्मी तथाप्येकस्य धर्मिण एक एव परिणामो युक्तः नह्येकरूपात्कारणात्कार्यभेदो भवि
तुमर्हतीति तस्याकस्मिकत्वप्रसंगात् न तत्तत्कारणविषमवधानाद्भविष्यतीति चेन्न गौरवात् तस्मात्कुर्वद्रूपत्वेनैक एव परिणामोऽस्तीति पुनरपि बौद्धः प्रत्यवतिष्ठते
तन्नाह क्रमान्यत्वं परिणामान्यत्वे हेतुः । एकस्य धर्मिणः परिणामनानात्वे क्रमभेदो हेतुर्लिंगमित्यर्थः । क्रमभेदश्च यथा मृद्धर्मी प्रथमं चूर्णभावं हित्वा पिंडभावं आप
द्यते कः क्रमः । ततश्च पिंडभावं हित्वा कपालभावं आपद्यते परः क्रमः एवमादयोऽन्येऽपि परिणामक्रमभेदाः सर्वत्र च मृन्मृदित्यनुगतप्रत्ययान्मृद एकत्वमिति ।१५।
तदुक्तं संयमादपरिसमाप्तेः संयमसिद्धिकृता विभूतय उच्यंते परिणामत्रयसंयमादतीतानागतज्ञानं । अस्य धर्मिणोऽयं धर्मपरिणामस्तस्य चायं लक्षणपरिणामस्त
स्याप्ययं नवपुराणावस्थापरिणाम इत्येवं रूपपरिणामत्रयसंयमाद्योगिनोऽतीतानागतज्ञानं भवति । यतश्चित्तस्य शुद्धसत्वप्रकाशरूपत्वात्सर्वार्थग्रहणसामर्थ्यं र

© Dharmartha Trust J&K. Digitized by eGangotri

उक्तमोमलप्रतिबंधेनापह्रियते तैस्तैरुपायैस्तदुभयजविक्षेपापहारे सति निश्चलमनस्येवादर्शस्य सर्वार्थग्रहणसामर्थ्यमैकाग्र्यताबलादाविर्भवतीत्यर्थः॥१६॥ संयमांतरमासि
ध्यंतरमाह॥ शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं॥ शब्दः श्रोत्रेंद्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थावच्छिन्नः॥ पूर्वपू
र्ववर्णसंस्कारसध्रीचीनचरमवर्णबुद्धिनिर्ग्राह्यः स्फोटात्मा वा। अर्थो जातिगुणक्रियासंज्ञास्वरूपः। प्रत्ययो ज्ञानं विषयाकारा बुद्धिवृत्तिः। एषां शब्दार्थप्रत्ययानां व्य
19 वहारे इतरेतराध्यासाद्भिन्नानामपि बुध्यैकरूपतापादनात्संकीर्णत्वं। तथाहि। गामानयेत्युक्ते कश्चिद्गोलक्षणमर्थं गोत्वजात्यवच्छिन्नं सास्नादिमत्पिंडरूपं
शब्दं च तद्वाचकं ज्ञानं च तद्ग्राहकमभेदेनैवाध्यवस्यति न त्वस्य गोशब्दो वाचकोयं च शब्दस्य वाच्यस्तयोरिदं ग्राहकं ज्ञानमिति भेदेन व्यवहरत्यत एव कोयमर्थः
र्थः कोयं शब्दः किमिदं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं ददाति गौरिति। स यद्येकरूपतां न प्रतिपद्यते कथमेकरूपमुत्तरं प्रयच्छति। एवं स्थिते योयं प्रवि
स्म भागः इदं शब्दस्य तत्त्वं यच्छ्रोत्रेंद्रियग्राह्यमिदमर्थस्य यत्तदितरचक्षुरादींद्रियग्राह्यमिदं ज्ञानस्य यद्विषयेंद्रियसंयोगादुद्भवतीति तस्मिन्प्रविभागे यः संयमस्त
स्मात्सर्वभूतानां पशुपक्ष्यादीनां रुतं योज्ञाप्रतिशब्दस्तद्ज्ञानं भवति। अनेनाभिप्रायेणानेनायं शब्द उच्चारित इति सर्वं जानाति। अक्रमवादीनां तु शब्दादन्यत्र वर्णेरसा



© Dharmartha Trust J&K. Digitized by eGangotri

साक्षात्करणादिविवर्तनं ५

क्षात्कारे सत्यपि तस्य साक्षात्कारस्य संयमजन्यत्वाभावान्न सर्वभूतरुतज्ञानं भवति किंतु तद्वतां योगिनामेव भवतीत्यर्थः। १७। सिध्यंतरमाह। संस्कारसाक्षात्कर
णात्पूर्वजातिज्ञानं। संयमादित्येतावत्पूर्वस्मात्सूत्रादिहापि संबध्यते। संयमात्पूर्वकं संस्कारस्य साक्षात्करणाज्जा [redacted] मांतरत्वस्मरणं भवतीत्यर्थः। संस्काराद्विवि
धाः केचित्स्मृतिमात्रोत्पादनफलाः अपरे जात्यायुर्भोगलक्षणविपाकहेतवो धर्माधर्मरूपाः। १८। सिध्यंतरमाह। प्रत्ययस्य परचित्तज्ञानं। संयमात्साक्षात्करणादि
त्युभयमिहापि संबध्यते। प्रत्ययस्य रागादिमत्याः परचित्तवृत्तेर्मुखरागादिना केनचिल्लिंगेन गृहीतायाः संयमपूर्वं साक्षात्करणात्परचित्तस्य साक्षात्कारो
भवतीत्यर्थः। १९। सिध्यंतरमाह। कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंप्रयोगेंतर्धानं। कायस्य यादृशं रूपं चक्षुर्ग्राह्यः स स्वगोगुणस्तत्कृतमिदं लिंगका स्थूलस्य ५
येरूपमिति संयमात्तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपायां शक्तौ तस्याः स्तंभे भावनावशात्प्रतिबंधे चक्षुःप्रकाशासंप्रयोगे परचक्षुःकिरणैरसंबंधेंतर्धानं योगि
नो भवति न केनचिद्दृश्यत इत्यर्थः। २०। एतेन शब्दाद्यंतर्धानमुक्तं। एतेन रूपांतर्धानोपायप्रदर्शनेन शब्दादीनां स्वीयानां परश्रोत्रादिग्राह्यत्वेनांतर्धानमु
क्तं वेदितव्यं। २१। सिध्यंतरमाह। सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्टेभ्यो वा। उपक्रमेण कार्यकरणाभिमुखत्वेन सहवर्तते सोपक्रमं

धः साक्षात्कारस्तस्मा २

साक्षात्करणादिसनुवर्तनं १

तीव्रवेगेनफलजनकंयथोष्णदेशेप्रसारितंवासःशीघ्रमेवशुष्यति॰उक्तविपरीतरूपंनिरुपक्रमंमंदवेगेनफलजनकं॰यथातदेवार्द्रवासःसंपिंडितमनुष्णदेशेचिरेण
शुष्यति॰तदस्मिन्द्विविधेकर्मणिसंयमाद्यःसाक्षात्कारस्तस्मात्॰परान्तस्यप्रज्ञापतेन[illegible]तोमरणमलयः॰नरादीनांमरणमपरांतस्तस्यज्ञानममुष्मिन्देशेऽमुष्मिन्कालेममदे
हवियोगइतिसाक्षात्कारोभवतीत्यर्थः॥२२॥तत्रसोपक्रमकर्मसाक्षात्कारेतद्विपाकस्यसमृद्धिभोगार्थंबहुशरीराणिगृहीत्वायोगीस्वेच्छयाम्रियतेएकेनतुतद्भोगेमरणेविलं
बः॥प्रसंगादाह॰अरिष्टेभ्योवेति॰अरिष्टानित्रिविधानि॰आध्यात्मिकाधिभौतिकाधिदैविकभेदेन॰तत्राध्यात्मिकानि॰पिहितकर्णपुटस्यप्राणघोषाश्रवणादीनि॰आधिभौतिका
न्यकस्माद्विकृतपुरुषदर्शनादीनि॰आधिदैविकान्यकाण्डएवद्रष्टुमशक्यस्वर्गादिपदार्थदर्शनादीनितेभ्योवामरणज्ञानंभवतियोगिनोपीत्यर्थः॥२२॥परिकर्मनिष्पादि
ताःसिद्धीःप्रतिपादयितुमाह॰मैत्र्यादिषुबलानि॰संयमात्साक्षात्कारणादिलस्तुवर्त्तते॰मैत्रीमुदिताकरुणामुदितासुसंयमपूर्वकात्साक्षात्कारान्मैत्र्यादिसंबंधी
निबलानिप्रादुर्भवंति॰मैत्रीकरुणामुदितास्तथास्यप्रकर्षंगच्छंतियथासर्वस्यमित्रत्वादिकमयंप्रतिपद्यते॰२३॥सिध्यंतरमाह॰बलेषुहस्तिबलादीनि॰संय
मात्साक्षात्कारादित्येव॰हस्तिहनुमद्गरुडादिबलेषुतद्भावेनसंयमपूर्वकात्साक्षात्कारात्तानिबलानियोगिनःप्रादुर्भवंति॰२४॥सिध्यंतरमाह॰प्रवृत्त्यालोकन्यासात्

20



© Dharmartha Trust J&K. Digitized by eGangotri

व्यवहित



क्ष्मौविप्रकृष्टज्ञानं ज्योतिष्मतीप्रवृत्तिः प्रथमपाद उक्ता तस्या आलोकः सात्विकः प्रकाशस्तस्य विषयेषु न्यासात्तद्वासितानां विषयाणां भावनातोऽन्तःकरणे ऽधिं
द्रियेषु प्रकृष्टशक्तितामापन्नेषु सूक्ष्मस्य परमाण्वादेर्व्यवहितस्य भूम्यन्तर्गतनिध्यादेर्विप्रकृष्टस्य मेरुपरपार्श्ववर्तिनो रसायनादेर्ज्ञानमुत्पद्यते·२५। एतत्स
मानवृत्तान्तं सिद्ध्यंतरमाह· भुवनज्ञानं सूर्ये संयमात्· सूर्ये प्रकाशमये संयमपूर्वकसाक्षात्काराद्भूरादिलोके यान्यवांतरभुवनानि तत्तत्सन्निवेशभांजि
पुराणि तद्विषये यथावदस्य ज्ञानमुत्पद्यते· पूर्वसूत्रे सात्विकप्रकाश आलंबनतयोक्तः अत्र नास्ति संयमापेक्षा· इह तु भौतिकप्रकाश आलंबनमिति सा
संयमापेक्षेति विशेषः।२६। भौतिकप्रकाशं तदालंबनद्वारेणैव सिद्ध्यंतरमाह· चंद्रे ताराव्यूहज्ञानं· संयमादित्यनुवर्तते साक्षात्करणादिति च· चंद्रे संयमपू
र्वकात्साक्षात्कारात्ताराणां नक्षत्राणां व्यूहस्य सन्निवेशविशेषस्य ज्ञानं भवति· सूर्यस्य नक्षत्राभिभावकत्वात्तत्संयमस्योक्तज्ञानजनकत्वासंभवादिति भा
वः।२७। ध्रुवे तद्गतिज्ञानं· ध्रुवे निश्चले ज्योतिषां प्रधाने संयमपूर्वकात्साक्षात्कारात्ताराणां या गतिः प्रत्येकं नियतकाला नियतदेशा च तत्सा
ज्ञानमुत्पद्यते·२८। बाह्याः सिद्धीः प्रतिपाद्याभ्यंतराः प्रतिपादयितुमुपक्रमते· नाभिचक्रे कायव्यूहज्ञानं· संयमात्साक्षात्करणादित्येव· कदलीकंदवदावुसंनं



© Dharmartha Trust J&K. Digitized by eGangotri

नाभिचक्राख्यं षशारं मध्यवर्तिं यतः आरवापल्लवादिवत्स्थितः पादादिकान्सर्वाधःपार्श्वेषामिर्भवति तस्मिन्संयमपूर्वकात्साक्षात्काराच्छरीरस्थपदार्थव्यूहं वातपित्त
श्लेष्मादिरूपं [redacted] यथावदवभासते॰२९॥ सिद्ध्यंतरमाह॰ कंठकूपे क्षुत्पिपासानिवृत्तिः॥ कूपाकारं कंठच्छिद्रं हृदयपर्यंतं तिष्ठति तस्मिन्संयमाद्विशेषतः सा
क्षात्कारेसति क्षुत्पिपासेन बाधेते॰३०॥ सिद्ध्यंतरमाह॰ कूर्मनाड्यां स्थैर्यं॥ कुंडलितसर्पवदवस्थितत्वात्कूर्माकारं हृदयपुंडरीकाख्यं नाडीचक्रं तत्र संयमपूर्वकसाक्षा
त्काराच्चित्तस्य स्थैर्यं भवति॰ यद्वा॰ कायस्य स्थैर्यं भवति न केनचित्॰ ×संयमात्साक्षात्करणादिसेव॰× संदर्शयितुं भावनात्पर्थः॥३१॥ सिद्ध्यंतरमाह॰ मूर्ध्निज्योतिषि सिद्धद
र्शनं॥ शिरःकपाले ब्रह्मरंध्राख्यं छिद्रं प्रकाशाधानत्वाज्ज्योतिर्यथा गृहाभ्यंतरस्थस्य मणेः प्रसरंती प्रभा कुंचिता विवरप्रदेशे संघटते तथा हृदयस्थः सात्विक
प्रकाशस्तत्र संपिंडितत्वं लभते तत्र संयम[redacted]पूर्वकात्साक्षात्काराद्यथावाप्यथिव्यांतरं तरालवर्तिनः सिद्धा दिव्यपुरुषास्तेषामितरप्राणिदृश्यानां दर्श
नं भवति॰३२॥ सर्वज्ञतोपायमाह॰ प्रातिभाद्वा सर्वं॥ संयमादिस्तु वर्तने॰ निमित्तानपेक्षं मनोमात्रजन्यमविसंवादि द्रुतमुत्पद्यमानं [redacted] ज्ञानं प्रातिभं तस्मात् संयमपू
र्वकः साक्षात्कारः प्रातिभस्तस्माद्विवेकख्यातेः प्रथममुत्पद्यमानात्तारकमेव पूर्वोक्तमतीतानागतादि सिद्धदर्शनांतमन्यद्वा जानाति योगी जानाति॰३३॥ संयमस्य हृ





© Dharmartha Trust J&K. Digitized by eGangotri

द्रसिद्धय उक्ताः इदानीमात्मसाक्षात्कारफलं संयमस्य वक्तुमिच्छन् क्रमादौ तत्संयमहेतोश्चित्तसाक्षात्कारस्य कारणं संयममाह। हृदये चित्तसंवित्। संयमात्साक्षात्कारणा
दित्येव। हृदयं शरीरस्य प्रदेशविशेषस्तस्मिन्नधोमुखस्वल्पच्छिद्रपुंडरीकाभ्यंतरे संयमात्साक्षात्कारपूर्वकाच्चित्तसाक्षात्कारो भवति। ३४। चित्तेऽज्ञाने चित्ताद्विवेकेनात्मसाक्षात्का
रो भवतीत्याह। सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थान्यस्वार्थसंयमात्पुरुषज्ञानं। सत्त्वं प्रकाशसुखात्मकः प्राधानिकः परिणामविशे
मो षो बुद्धितत्त्ववाच्यः पुरुषो भोक्ताधिष्ठाता स्वरूपस्तयोरत्यन्तविधर्मिणोरपि प्रत्ययाविशेषः प्रत्ययस्य बुद्ध्याविवेको भोगः स परार्थः तयोः प्रत्यययोर्मध्ये परार्थात्प्रत्ययाद्विवेकेन स्वार्थे
पौरुषेये प्रत्यये संयमात्साक्षात्कारपूर्वकाद्धेतोः स्वयमेव पूर्णबाधयोग्यविशेषैः पुरुषसाक्षात्कारो भवतीति तादृग्भासंयमाभावेऽपीत्यर्थः। बुद्धेः प्रत्ययः शान्तघोराकारसुखदुःखात्मिका घा
वृत्तिः पुरुषस्य प्रत्ययश्चलदवच्छिन्नं चैतन्यं तत्र चैकस्मात्र एकैकस्य गौणो भोगः स च चिदवसान इति सांख्यसूत्रे योगभाष्ये च प्रसिद्धः। अनेन तु सूत्रेण तप्तायःपिंडवद
विविक्तं तदुभयमपि भोग इति लोकव्यवहारेणोक्तं। लोके हि स्त्र्यादिष्टोऽहं सुखी सौख्याभिमानपूर्वकसुखाद्यनुभव एव भोग इत्युच्यते। भोगमध्ये चैतन्यस्याविवेकश्च यत
यात्रसूत्रेऽपि भोगो लक्षितः। आत्मतत्त्वज्ञानार्थिभिरेतत्संयमस्यैवावश्यापेक्षणादिति। ३५। स्वार्थप्रत्ययसंयमेनात्मसाक्षात्कारे जाते तच्चिह्नानि वक्ष्यमाणस्य विवेकज्ञानस्य पूर्वरूपा

© Dharmartha Trust J&K. Digitized by eGangotri

णि प्रातिभाद्याः सिद्धयो भवन्ति। तास्वयुक्तवैकाग्र्यपर्यवसितेनासंप्रज्ञातयोगे विघ्नभूता इति प्रतिपादयितुं आदौ ताः प्रदर्शयति। ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते। ततः पु
रुषसाक्षात्कारात् मनआदीनां प्रातिभादिसंज्ञाः षट् सिद्धयो[redacted]सामर्थ्यविशेषरूपा भवन्ति। तत्रोपदेशादिकं विनापि सूक्ष्मव्यवहितादिषु मनसो यथार्थज्ञानं प्रातिभमित्युच्य
ते। श्रोत्रस्य नाद्यंशसामर्थ्यं श्रावणं। त्वचस्ताद्यंशसामर्थ्यं वेदनं। चक्षुष आदर्शः। रसनाया आ[redacted]स्वादः। घ्राणस्य वार्त्तेति। ३६। एतेषां फलविशेषाणां विषयविभागं वक्तुमसं
प्रज्ञातं प्राप्तस्य तत्रोपेक्षणीयतामाह। ते समाधावुपसर्गा व्युत्थाने सिद्धयः। ते प्रातिभाद्याः समाधौ विघ्नरूपा व्युत्थाने व्युत्थितचित्तानामेव सिद्धयः पुरुषार्थत्वेनोपादेयाः न
समाहितचित्तानामित्यर्थः। ३७। ज्ञानादिरूपाः संयमसिद्धय उक्ताः संप्रति क्रियारूपा अपि ता[redacted]ः कतिपयसूत्रैराह। बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्त
स्य परशरीरावेशः। चंचलस्वभावस्यापि मनसो धर्माधर्मवशादेव शरीरे बन्धो ज्ञानहेतुसंयोगस्थैर्यं भवति। तस्य बन्धकारणस्य कर्मणः शैथिल्यं दृढबन्धनाक्ष
मतारूपं तानवं चित्तस्य प्रचारसंवेदनं चानया नाड्या एवं प्रकारेण चित्तं शरीरे प्रविशति निर्गच्छतीति चेत्येवंरूपं योगजधर्माज्जायते। ततस्ताभ्यां हेतुभ्यां योगिनाप
रशरीरावेशात्सिद्धिर्भवति। यथा स्वशरीरात् लिङ्गशरीरं निःसार्य परशरीरे प्रवेशयतीत्यर्थः। ३८। योगशास्त्रोक्तसंयमविशेषजस्योदानजयस्य सिद्धिमाह।



© Dharmartha Trust J&K. Digitized by eGangotri

सिध्यंतरमाह: कोष्ठस्यावरणभूतः जये

उदानजयाज्जलपंककंटकादिष्वसंग उत्क्रांतिश्च · रसादिवर्द्धनमूर्ध्नानाड्यूर्ध्वगतिमद्वायोरूर्ध्वसंचारी प्राणस्यावांतरभेद उदान उच्यते तस्य संयमाद्विशेषेण [redacted] स्वा
यत्ततायां कृतायां जलादिषु संचरतोऽपि तैः असंगो विकारहेतुसंयोगाभावः न्यता भवति · तथार्चिरादिमार्गेण ब्रह्मलोकगमनाय ब्रह्मरंध्रं भित्वा लिंगशरीरस्य ब
हिर्निःसारणं च स्वेच्छया भवतीत्यर्थः ॥ ३९ ॥ समानजयात्प्रज्वलनं · समं सर्वनाडीषु रसानां संचारणात्समानः प्राणभेदस्तस्य संयमविशेषेण यत्ततायां
कृतायां कोष्ठस्यावरणपाकरणात्तेनाग्निना शरीरस्य प्रज्वलनं दाहो भवति सती देहस्येवेत्यर्थः । राजहंसोऽपि तु निरावरणस्याग्नेरूर्ध्वगत्वेन तत्तेजसा ज्वल
न्निव योगी प्रतिभातीत्यर्थ इत्युक्तं ॥ ४० ॥ सिध्यंतरमाह · श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रं · श्रोत्रस्याहंकारिकत्वेऽप्याकाशमंद [redacted] हंकारे [redacted] णकाशदेश
विशेषरूपे [redacted] कर्णशष्कुल्यवच्छेदेन वर्तमानस्य जनानयोः संबंधो देशदेशिरूपस्तस्मिन्कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते युगपत्सूक्ष्मव्यवहितविप्रकृष्टश
ब्दग्रहणसमर्थं भवतीत्यर्थः [redacted] उपलक्षणं चैतत्त्वग्वायोश्चक्षुस्तेजसो रसनोदकयोर्घ्राणपृथिव्योः संबंधसंयमाद्दिव्यत्वगादीनां ॥ ४१ ॥ सिध्यं
तरमाह · कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं · यत्र कायस्तत्तदवकाशदायाकाशेनास्ति संबंधः व्याप्त्यरूपः संयोगस्तत्र

© Dharmartha Trust J&K. Digitized by eGangotri

[redacted]

संयमं विधाय लघुनि तूलादौ च समापत्तिं तन्मयीभावलक्षणां विधाय प्राप्ताभ्यासं तल्लघुभावो योगी तंतुजालेनोर्णनाभरसवादिस्वरश्मिभिर्विहरन्नपेक्ष्य आकाशेन गच्छतीत्यर्थः॥४२॥ सिध्यं
तरमाह बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः॥ शरीराद्बहिर्या मनसः शरीरनैरपेक्ष्येण वृत्तिः साहंकारभावं परित्यज्यावृत्तिः सा महाविदेहाख्या योग
शास्त्रोक्तसंयमविशेषजन्मा ततश्च प्रकाशावरणस्य सात्विकचित्तसत्वावरकस्य क्लेशकर्मादेः क्षयः प्रविलयो भवति यस्मात् क्लेशावरणं योगिनश्चित्तं स्वेच्छया वि
हरति विजानाति चेत्यर्थः॥ शरीरप्रविष्टस्यैव मनसो बहिर्वर्तितादिवृत्तिः कल्पिता नत्वाता शरीरात् कल्पिता महाविदेहास्येति तत्र व्यवस्था॥४३॥ प्रतिपादिताः सिद्ध
यो बाह्याभ्यंतराः परिकर्मभूताः समाध्युपयोगिन्यश्च संप्रति स्वसर्वोपयोगिसंप्रज्ञानासंप्रज्ञाता समाध्युपायभूतान्याह सग्रहणग्रहीतृ संयमस्य सिद्धीर्दर्शयन्ना
दौ ग्राह्यसं[redacted]यमासिद्धिमाह स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः॥ पृथिव्यादीनां भूतानां पञ्चानामपि ये पञ्चावस्थाविशेषरूपा धर्माः स्थूलत्वादय
[redacted]स्तेषु संयमाद्भूतजयेस्ते सां वशीकारः स्वेच्छानुविधायित्वं भवतीति योगिन इत्यर्थः॥ तथाहि भूतानां परिदृश्यमानं विशिष्टाकारवत्स्थूलरूपं स्वरूपं चैषां यथाक्र
मं कार्कश्यस्नेहौष्ण्यप्रेरणावकाशदानलक्षणं सूक्ष्मं यथाक्रमं भूतानां कारणत्वेन व्यवस्थितानि गंधादितन्मात्राणि अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थितिरोथा

23

© Dharmartha Trust J&K. Digitized by eGangotri

नरूपेण सर्वथैवान्वितनयोपलभ्यंते· अर्थवत्त्वं तु भोगापवर्गसामर्थ्यं गुणानिष्ठं भूतेषु गुणान्वयादागतं· न देवं भूतेषु पंचस्वस्वरूपधर्मलक्षणावस्थाभिन्नेषु प्रत्येकं संयमं कुर्व
तो योगिनः स्वसंकल्पानुसारीणि भूतानि भवंति वत्सानुसारिण्यो गाव इत्यर्थः॥४४॥ तस्यैव भूतजयस्य फलमाह· ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च॥ अ
णिमा परमाणुतुल्यता महिमा महत्त्वं विभुत्वमित्यावत्· लघिमा लघुत्वं तूलपिंडवत्· गरिमा गुरुत्वमेवादिवत्· प्राप्तिरंगुल्यग्रेण चंद्रस्पर्शनशक्तिता· प्राकाम्यमिच्छान
भिघातः सत्यसंकल्पत्वमित्यावत्· ईशित्वं सर्वत्र प्रभविष्णुता· वशित्वं सर्वाण्येव भूतानि तदुक्तमनुसारित्वान्नातिक्रामंति· त[redacted]णिमाद्याः समाध्युपयोगिनोष्टस्थूलज
याद्भवंति यथा परमाणुत्वं प्राप्तो वज्रादीनप्यंतः प्रविशतीत्येवं· स्वरूपजयात्प्राकाम्यं भवति· प्रसादित्वं पंच हेतुसंयमादिति विभागः॥ कायसंप[redacted]दुत्तरसूत्रेवक्ष्यमाणा
तस्य कायस्य भूतधर्मैः काठिन्यादिभिरनभिघातश्च भूतजयात्सिध्यति येनाशिलां तार्वि शान्तिशीतोष्णादयश्चैनं न बाधंत इत्यर्थः॥४५॥ प्रसिद्धतां कायसिद्धिविषयमव्याख्याय कायसंप
दं व्याचष्टे· रूपलावण्यबलवज्रसंहननत्वानि कायसंपत्· वज्रवत्कठिनः संघातोऽस्येति वज्रसंहननः॥ शेषं स्पष्टं॥४६॥ याथ संयमस्यासिद्धय उक्ताः ग्रहणसंयमस्य सिद्धीराह्य
हणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः· ग्रहणमिंद्रियाणां विषयाभिमुखी वृत्तिः॥ स्वरूपं तु सामान्येन प्रकाशकत्वं· अस्मिताहंकारानुगमः अन्वयार्थवत्त्वे च पूर्व

© Dharmartha Trust J&K. Digitized by eGangotri

वत्त्वः एतेषामिंद्रियाणामवस्थापंचके पूर्ववत्संयमं कुर्वतो योगिन इंद्रियजयो भवति एतत्संकल्पानुविधेयानींद्रियाणि भवंति न पुनर्विषयधर्मानुपातादयमिंद्रियैरपकाश्यत इ
२५ त्यर्थः।४७। तस्य फलमाह· ततो मनोजवित्वं विकरणभावः प्रधानजयश्च· मनोवच्छीघ्रतनादेर्गतिर्मनोजवित्वं· स्थूलदेहनिरपेक्षाणामिंद्रियाणां सर्वत्र वृत्तिलाभो विकरणभावः। प्र
धानस्य प्रकृतेः स्ववश्यतापरिणमनं एताः सिद्धयो जितेंद्रियस्य भवंतीत्यर्थः।४८। एताः शास्त्रे सिद्धयो मधुमत्य इति मधुमतीका इति चोच्यंते यतो मधुवत्सर्वेकमपि स्वदंते योगिनां ·४९। ग्रा
ह्यग्रहणयोः सिद्धिरुक्ता ग्रहीतृसंयमस्य सिद्धिमाह सूत्राभ्यां· सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च· मात्रयायेन संयमरूपताख्यातेर्लभ्यते· तयाच [redacted]
पूर्वोक्तसंयमेन निर्धूतरजस्तमोमलस्यांतःकरणस्य जये वशीकारसंज्ञायामपरस्यां विरक्तौ स्थितस्य योगिनः सत्वपुरुषयोर्बुद्धिबोध्ययोर्यान्यताख्याति [redacted] :पदस्य न विकोविकता
बुद्धिः सा जायते तन्मात्रस्य तदा हृत्ते ईसंतना संस्थायाः फलं सर्वभावाधिष्ठातृत्वं प्रकृतिपुरुषविकृतीनां स्वेनायित्वं सर्वेषां भूतभवद्भाविनां ज्ञातृत्वं चासिध्याति· एषा च विशोकानाम
सिद्धिः शास्त्रे परिभाषिता·५०। सर्वसिद्धिरूपस्यांविवेकख्यातेः परवैराग्यकारकं सिद्धांतमाह· तद्वैराग्यादपि दोषबीजक्षये कैवल्यं· अपियाश्चः कैवल्यमिसनेनान्वयी· तस्यां वि
शोकायां सिद्धौ वैराग्यात्तथैतो विवेकख्यातावपि वैराग्यं पर भवति तदस्मात् संप्रज्ञातयोगनिष्पन्नात् दुःखदोषस्य बीजानामविद्यावासनाकर्मणां क्षये सर्वात्मना निरोधाने पुरुषस्य कै



© Dharmartha Trust J&K. Digitized by eGangotri

वत्यमासंनिकः प्रद्यतिविस्मयोभवतीत्यर्थः।यस्यचासंप्रज्ञातानिष्पत्त्याप्रारब्धकर्मनोक्षियतेतस्यापिप्रारब्धसमाप्त्यनंतरमुत्पद्यमानोमोक्षएवयथोक्तंसं[redacted]
यमात्सिद्धिरिति॥५०॥उक्तस्यात्मसंयमिनःकैवल्यात्मसिद्ध्यर्थंनकेवलंसार्वज्ञादिसिद्धिषुवैराग्यमेवापेक्ष्यते।अपितन्मदपीत्याह॥ स्थान्युपनिमंत्रणेसंगस्मया
करणंपुनरनिष्टप्रसंगात्॥ स्थानिनःस्वर्गादिलोकाधिकारिणोदेवाइंद्रादयस्तेषांस्वस्वलोकमानितयनायपयोगिनउपनिमंत्रणे[illegible]दिव्यस्त्रीरसायनाय
नाद्युपकल्पनेसतितानेनतत्रस्मयःकर्त्तव्यःस्मयोवा।अन्यथापुनःसंसारप्रसंगादिति॥५१॥सार्वज्ञेपिवैराग्यान्मोक्षइत्युक्तंयदिचतत्ररागोनगच्छतिवास
नाप्राबल्यादिदोषात्तदानुरागनिवृत्तयेसर्ववस्तुसर्वज्ञतासाधकंसंयमांतरंकार्त्तव्यमित्याह॥ क्षणतत्क्रमयोःसंयमाद्विवेकजंज्ञानं॥ क्षणःसर्वांत्यःकालावयवो
यस्यावयवाःप्रविभक्तुंनशक्यंतेतेषांविधानांक्षणानांयःक्रमःपौर्वापर्येणपरिणमस्तत्रसंयमादपिप्रागुक्तंविवेकजंज्ञानमुत्पद्यतेसर्ववस्तूनामशेषवि
शेषैर्विविच्यसाक्षात्कारोभवतीत्यर्थः।अयमर्थः।प्रतिक्षणंसर्ववस्तूनांपरिणामावश्यंभावात्क्षणेषुतत्क्रमेषुचसाक्षात्कृतेषुसत्सुसर्ववस्तूनामपिपरिणाम
तत्क्रमयोर्ज्ञानात्सर्ववस्तूनांविवेकेनज्ञानंभवतीति॥५२॥विवेकजज्ञानस्यैकमुदाहरणमाह॥ जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततःप्रतिपत्तिः॥

© Dharmartha Trust J&K. Digitized by eGangotri

पदार्थानांभेदहेतवोजातिलक्षणदेशाभवंति· तत्रक्वचिद्भेदहेतुर्जातिर्यथागौरयंमहिषोयमिति· जात्यातुल्ययोर्भेदेलक्षणंभेदहेतुः॥ इयंकर्बुरेयमरुणेति· जात्यालक्षणेनचतु-
ल्ययोर्देशोभेदहेतुः॥ यथातुल्यप्रमाणयोरामलकयोर्भिन्नदेशस्थितयोः॥ यत्रपुनर्भेदोवधारयितुंनशक्यतेयथापूर्वदेशस्थितमामलकंविषयांतरासक्तस्यकस्यचित्पुर-
तदेशेकेनापिनीयतेतद्वन्नदेशान्तरस्थंचतत्समानमामलकांतरंपूर्वदेशेनीयतेतदातयोरामलकयोःसजातीयत्वात्सलक्षणत्वाच्चाभेदेनसमानदेशस्थत्वाच्चेदंतत्पूर्वदेशा-
स्थमिदंमुत्तरदेशस्थमिति· तत्रतयोरामलकयोस्तत्तद्देशसंबंधलक्षणेनांसंयमेनसाक्षात्करणात्तद्भेदेनैवामलकयोर्भेदप्रतिपत्तिर्योगिनोभवति· एतत्क्षणसंय-
माद्विवेकप्रतिपत्तेरुदाहरणं· क्षणात्क्रमसंयमजाद्विवेकप्रतिपत्तेस्तुयथाद्वित्रिक्षणमात्रेणज्येष्ठकनिष्ठयोर्ज्येष्ठकनिष्ठताविवेकज्ञानंक्षणक्रमसाक्षात्कारंविनानसंभ-
वतीत्यतःक्षणसंयमस्तत्रकारणमिति· ५३॥ विवेकजज्ञानस्यैकमुदाहरणंप्रदर्शितं· इदानींसहेतुकंविवेकज्ञानस्योपयोगमाह· तारकंसर्वविषयंसर्वथाविषयमक्रमं-
चेतिविवेकजंज्ञानं· इतियाश्लोकेत्वर्थः· यतोविवेकजंज्ञानंसर्वविषयादिरूपमतःसर्ववस्तुषुवैराग्येणदोषदर्शनादिनाचधारेणसंसारात्तारकंभवति· तत्रसर्वविषय-
सर्वाणिमहदादीनिविषयोस्येति· सर्वथाविषयत्वंचसर्वाभिरवस्थाभिःस्थूलसूक्ष्मरूपसत्त्वादिभेदेनतैस्तैःस्वपरिणामैःसर्वेणप्रकारेणव्यवस्थितानितत्त्वानिविषयोस्येति· अक्र-



© Dharmartha Trust J&K. Digitized by eGangotri

मतं च युगपदेव करतलामलकवत्सर्वं समस्तालंबनत्वं ॥ ५४ ॥ एवमंतिविवेकजेण विवेकख्यातिपरमावधिकांतास्ताः सिद्धीरिति फलान्संयमानुपन्यस्य तत्र विवेकख्यातेः परमावधित्वम
स्तुभावात्सत्वपुरुषयोरन्यतासाक्षात्कारभाजं मुक्त्यपेकल्पत इत्याह । सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् । बुद्धितत्वस्य गुणेन सह समानावक्ष्यमाणरूपा शुद्धिर्भवति यदा तदेव
मोक्षो भवति न तत्रान्यदपेक्ष्यमस्तीत्यर्थः । निरभिमानं पुरुषस्यात्र शुद्धिर्भोग्यपरतोक्ता । तथा च यथा साक्षी निरभिमान एवं चेच्चित्तं निरभिमानं भवति विवेकनिष्ठया तदा प्राप्त
सिद्धेरप्राप्तसिद्धेर्वावश्यं मोक्षो भवति नैश्वर्यापेक्षेति । ननु षष्ठांगे योगे ऽभ्यस्यमाने सिद्धिनवश्यं भविष्यसेवेति चेन्न । सिद्धिवैराग्यात्सिद्धिप्रतिबंधकापायेन सति सिध्यनुत्प
त्संभवादिति ॥ ५५ ॥ ॥ पातंजलानां सूत्राणामुदयंकरदर्शिते । वृत्तिर्थसंज्ञके पादस्तृतीयः संगतो गतः ॥ ननु ध्यातिमितोक्तौ कोपरेण गुणबुद्धिमुक्तिसकलावर्जनेन तस्मात्स
मर्षोज्जलिरेष नः ॥ इति विभूतिपादस्तृतीयः समाप्तः ॥ ॥ एवं प्रथमपादेन योग उक्तो द्वितीयेन तत्साधनान्युक्तानि तृतीये ऽर्थासादनार्थं विभूतयो व्याख्याताः । इदानीं विप्रतिपत्ति
समुत्थभ्रांतिनिराकरणेन मुक्तात्कैवल्यस्वरूपावस्थापनाय कैवल्यपादश्चतुर्थ आरभ्यते । तत्रादौ कैवल्ययोग्यं चित्तं निर्धारयितुं सर्वोक्तासिद्धीनां हेतुभेदं संचाविधत्वमाह ।
जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः । जन्मना पक्ष्यादीनामाकाशगमनादिसिद्धिः कपिलादीनां च ज्ञानप्रकर्षादिरूपा सांसिद्धिकी उच्यते । इंद्रजिनाद्विरल्पानेन्नावयवानां वा

© Dharmartha Trust J&K. Digitized by eGangotri

नराणांपुनरवयवविरोहणं सिद्धिरौषधिसेवनात्‌जापकेक्ष्वाकुप्रभृतीनांस्वर्गाद्याकर्षणं सिद्धिर्जपात्‌तपसाविश्वामित्रादीनांआत्मगणाघवाभिसिद्धिः।स्मा
श्वतकाःसिद्धयःपूर्वजन्माभ्यस्तयोगजाएवजन्मादिनानिमित्तेनव्यज्यंते।अतश्चयोगाभ्यासेविश्वासतःप्रवृत्तिः।इहजन्मनिसंधेनसिद्धावपिजन्मांतरेतदवश्यंभावा
26 त्‌समाधिजास्तुपूर्वपादेव्याख्याताः।तस्मात्समाधिसिद्धावितरासांसिद्धीनांजन्मांतराभ्यस्तःसमाधिरेवकारणंमंत्रादीनितुनिमित्तमात्राणि।१।ननुनंदी
श्वरादीनांजात्यादिपरिणामस्तस्मिन्नेवजन्मनिदृश्यतेतत्कथंजन्मांतराभ्यस्तसमाधिस्तत्रकारणमतआह।जात्यंतरपरिणामःप्रकृत्यापूरात्‌।योयमेकस्मिन्ने
वजन्मनिनंदीश्वरादीनांमानुषदेहतिरोधानेनदिव्यदेहपरिणामःसप्रकृत्यापूरात्‌प्रकृतेर्दिव्यदेहारंभकावयवरूपायास्तिरोहित [redacted] भावंपरित्यज
कार्यारंभकभावआपूरस्तस्मात्‌।२।ननुप्रकृत्यापूरोधर्मादिनिमित्तमपेक्षतेनवा।नचेत्सर्वत्रप्रकृत्यापूरापत्तिः।अपेक्षतेचेत्प्रकृतिस्वातंत्र्यसिद्धांतभंगः।इत्याप
त्तावीश्वरसंकल्पप्रकृतीविनासर्गादौप्रकृतिप्रवृत्तेरनुपपत्तेरीश्वरस्यवैषम्यनैर्घृण्यप्रसंगस्तत्राह।निमित्तमप्रयोजकंप्रकृतीनांवरणभेदस्तुततःक्षेत्रिकवत्‌।
धर्मादिरूपंनिमित्तकारणंप्रकृतीनांमहदादिकारणानांअप्रयोजकंप्रवर्तकंनभवतिनस्वतएवप्रवृत्तिस्वाभाव्यात्किंतुततोनिमित्तकारणाद्वरणभंगःवरणस्यावरक



© Dharmartha Trust J&K. Digitized by eGangotri

स्यप्रतिबंधकस्याधर्मादेर्निवृत्तिमात्रंभवति॰धर्मेणाधर्मनिरासेप्रकृतयःस्वयमेवदेवादिपरिणामेप्रवर्त्तंते॰अत्रदृष्टांतः॥क्षेत्रिकवत्॰यथाकृषीवलोजलस्योन्नतना
देशावरकस्यभेदनमात्रंकरोतिततोजलंस्वयमेवकेदारांतरेप्रवर्त्ततेनतुद्दिसर्थः॥अचेतनंचेतनाधिष्ठितमेवप्रवर्त्ततइतिनियमस्यास्माभिरनंगीकारान्नवैषम्य
नैर्घृण्येईश्वरस्यनप्रसज्येतेइतिभावः॥३॥यदासाक्षात्कृततत्त्वस्ययोगिनोयुगपत्कर्मफलोपभोगायात्मीयानिरतिशयविभूत्याघटुभवाद्युगपदनेकशरीरनिर्मित्सा
जायतेतदाकुतस्तानिचित्तानिभवंतीत्यतआह॰निर्माणचित्तान्यस्मितामात्रात्॰योगप्रभावान्निर्मीयंतइतिनिर्माणानिचित्तानिमनांसियोगिसंकल्पाधीनंप्रकृत्यापूरणात् काय
कायवन्मनःप्रकृतेरहंकारस्यापूरणाज्जायंतइत्यर्थः॥४॥ननुबहूनांचित्तानांभिन्नाभिप्रायत्वान्नैककार्यकर्तृत्वंयोगिनःप्रसज्यतइत्यतआह॰प्रवृत्तिभेदेप्रयोजकंचित्त
मेकमनेकेषां॰तेषामनेकेषांनिर्माणचित्तानांप्रवृत्तिभेदेप[redacted]तिनियतव्यापारेप्रयोजकंनिर्मातृचित्तमेवभवति॰निर्मातृचित्तसंकल्पेनैवतेषामखिलव्यापाराइ
त्यर्थः॥५॥तदेवमुक्तेषुसिद्धचित्तेषुमध्येमोक्षयोग्यंचित्तमवधारयति॰तत्रध्यानजमनाशयं॰तेषुसिद्धचित्तेषुमध्येध्यानेनसमाधिनासंस्कृतमेवचित्तमनाशयंनिर्वास
नंभवतिनमंत्रादिसंस्कृतमित्यर्थः॥समाधिनैवयोगक्षयद्वारानिखिलवासनोन्मूलनसंभवादिति॰६॥इतश्चध्यानजंचित्तमेवमोक्षयोग्यमित्याह॰कर्माशुक्लाकृष्णंयो

स्तेर्विस्फुलिंगवद्युगप ४

[redacted]

© Dharmartha Trust J&K. Digitized by eGangotri

गिनां त्रिविधमितरेषां। शुक्लं कर्म यागादिस्वरूपं शुभफलदं। अशुभमशुभफलप्रदं ब्रह्महत्यादि। तदुभयसंकीर्णं शुक्लकृष्णं। तत्र शुक्लं कर्म विचक्षणानां दानतपः

27 स्वाध्यायादिमतां। कृष्णं नारकाणामासुरस्वभावानामितरेषां शुक्लकृष्णं यथासंभवं जन्मादिसिद्धियुतानामपि योगरहितानां। योगिनां पुनः संन्यास-

वतामेवंविधकर्मविपरीतं यत्फलत्यागानुसंधानेनैवानुष्ठानात्सर्वेणापि न किंचित्फलमारभते ७ ननु ध्यानजानामाशयरहितत्वं योगिनामेव मोक्ष इति

कुतः। न च योगरहितानां कर्मैवोक्तलक्षणं तत्प्रतिबंधकं स्यात्। न स्यात्। तेषामपि भोगवासनानभिव्यक्तौ कदाचित्तस्य पुनर्निवारत्वादत आह। ततस्तद्वि

पाकानुगुणानामेवाभिव्यक्तिर्वासनानां। एतस्मात्त्रिविधात्कर्मणो भोगवासना [redacted] मभिव्यक्तिर्भवति तत्र भवति कर्मणि सति वासनानभिव्यक्तौ

भावो न घटते। [redacted] नन्वेवं मानुष्यप्रापककर्मणो [redacted] पिपश्वादिभोगवासनाभिव्यक्तौ तृणपर्णादिभोजनादौ प्रवृत्त्यापत्तिस्तत्राह। तद्विपाकानु

गुणानामेवेति। स्वविपाकहेतुभूतवासनानामेवाभिव्यक्तिर्भवति न सर्वासामिति सूत्रार्थः। ८ ननु यस्य कर्मणो विपाकानुगुणा वासना बहुजन्मादिव्यव

हितास्तस्य तदभिव्यंजकत्वं न घटते संनिहितवासनां परित्यज्य व्यवहितवासनाभिव्यक्तेरनौचित्यादत आह। जातिदेशकालव्यवहितानामप्यानंतर्यं स्मृ

तिसंस्कारयोरेकरूपत्वात्। जातिर्जन्म कोघवधिदेशो वर्मद्वीपादिलक्षणः कालश्च युगकल्पादिस्वरूपस्तैर्व्यवहितानामपि वासनानामानंतर्यं अव्यव २७

© Dharmartha Trust J&K. Digitized by eGangotri

इतिवत्कार्यकारित्वंकल्प्यते·कस्मात्स्मृतिसंस्कारयोरेकरूपत्वात्·नहिजातमात्रस्यस्तनपानादीष्टसाधनतादिस्मृतिस्तत्तमानाकारवासनांविनोपपद्यते·तथा
ह्यनुष्ठीयमानात्कर्मणश्चित्तसत्त्ववासनारूपःसंस्कारःसमुत्पद्यतेसचस्तनपानादीनांतत्तत्कर्मफलानामंकुरीभावःकर्मणांवासूक्ष्मशक्तिरूपेणावस्थानं·संस्का
राच्चस्मृतिःस्मृतेश्च [redacted] तत्तत्कर्मफलोपभोगःततस्तत्सुखदुःखानुभवःतत्तदनुभवाच्चपुनरपिसंस्कारस्मृत्यादयः।एवंचस्मृतिसंस्काराद
योयस्यभिन्नास्तस्यानंतर्याभावेदुर्लभःकार्यकारणभावः।अस्माकंतुयदानुभवएवसंस्कारात्मनापरिणमतेसंस्कारश्चस्मृत्यात्मनातदैकस्यैवचित्तस्या
नुसंधातृत्वेनस्थितत्वात्कार्यकारणभावोनदुर्घटः।९।नन्वेवंसकलजन्मार्थवासनांगीकारेऽनवस्थापत्तिरित्याशंकांप्रामाणिकत्वेनाभ्युपगम्यापा
करोति·तासामनादित्वंचाशिषोनित्यत्वात्·नकेवलंतासांवासनानामानंतर्यंकिंत्वनादित्वमपीतिचार्थः।कुतः।आशिषोनित्यत्वात्·येयमाशीर्महामो
हरूपासदैवसुखसाधनानिमेभूयासुर्माकदाचनवियोगस्तैर्मेभूदितियःसंकल्पविशेषोवासनानांकारणंतस्यनित्यत्वादनादित्वमित्यर्थः।एतदुक्तं
भवति·कारणस्यसान्निहितत्वादनुभवसंस्कारादीनांकार्याणांप्रवृत्तिःकेनवार्यते·अनुभवसंस्काराद्यनुविद्धसंकोचविकासधर्मिचित्तंतत्तदभिव्यंजकतत्तद्

© Dharmartha Trust J&K. Digitized by eGangotri

तस्या अपि पूर्वपूर्वानादिवासनेति संसारचक्रमावर्ततेऽस्य यतः ४

…दित्वात्तत्तत्फलस्वरूपतया परिणमत इत्यर्थः ।१०। यथानंतसंवासनानां तदाऽथाक समुच्छेदास्याः कथं एतं उं शंक्य अत आह हेतुफलाश्रयालंबनैः संगृहीतत्वादे
षामभावे तदभावः नैता पुरुषवदनादयः किंतु प्रवाहानादयः अतः कारणोच्छेदात्तदुच्छेदसंभवः । तथाहि अखिलवासनानामनंतरो विषयो [redacted]
[redacted] पभोगे हेतुस्तस्य धर्माधर्मौ तयोरपि परनियहानुग्रहादिना रागद्वेषौ तयोरपि ब्राह्मणोऽहं ममेदमिष्टमनिष्टं वेति भ्रमस्तस्यापि पूर्वपूर्वभ्रमसंस्कार
लक्षणं उविद्येति साक्षात्पारंपर्येण च हेतुः फलं देहा [redacted] दिस्मृत्यादिश्च आश्रयो बुद्धितत्त्वं चित्ताख्यं आलंबनं यदेवोपभोगस्य तदेव प्राग्घायत्नम
विषयस्वरूपं अतस्तैर्हेतुफलाश्रयालंबनैरनंतानामपि वासनानां संगृहीतत्वाद्व्याप्तत्वादेतेषामभावे संतोच्छेदे विदेहमुक्तिसमये तदभावस्तदवि
नाभूतानां वासनानामसंतोच्छेदो भवतीत्यर्थः । तथा च वासनानामानंत्येऽपि मोक्षो नानुपपन्न इति भावः ।११। ननु वासनारूपाणां संस्काराणां तत्फ
लानां च देहादीनामुक्तः कार्यकारणभावो दुर्घटः एकदेशास्थितेन हि कारणेन कार्यमुत्पादनीयं देशश्च चित्तरूपो विवक्षितः न चासावेकस्तस्य प्रतिक्षणं नश्वरत्वो
पलब्धेरत आह अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणां असतां भावानामुत्पत्तिर्न युक्तिमती नेषां सतस्संबंधायोगात् नहि शशविषाणादीनां क्वचिदपि सतस्संबंधो दृष्टः



© Dharmartha Trust J&K. Digitized by eGangotri

सतामपिविरोधान्नाभावस्संभवोस्ति।यत्स्वस्वरूपमध्वसत्ताकंतत्कथंनिरुपाख्यतांभजेत्।यदाहभगवान्।नासतोविद्यतेभावोनाभावोविद्यतेसतइति।तस्मात्सतांनाभाव

संभवात्सतांचोत्पत्तेरसंभवात्।कामःसंकल्पोविचिकित्सेत्यादिश्रुतिदर्शितैःकामादिरूपैर्धर्मैःपरिणममानाधर्मिरूपाधर्मासदैकरूपत्वादवतिष्ठते।ननुकामादयःप्र

८३ तिक्षणमुत्पद्य...नश्यन्तितदुक्तदोषात्।धर्मास्तुतेषदवापिकत्वेनव्यवस्थिताअस्मिन्ध्वनिनस्वरूपमजन्ति।वर्तमानेऽध्वनिव्यवस्थिताःकेवलंभोग्यतांभजन्ते।न

मे ४ स्मादपवर्गपर्यन्तमेवचित्तंधर्मितयानिरोद्धुंनपार्यते। [redacted] ।१२।ततस्तेधर्मधर्मिणःकिंस्वरूपाइत्यतआह।तेव्यक्तसूक्ष्मागुणात्मानः।तेकार्यरूपेणपरिणममानाःका

मादयःकारणरूपेणपरिणामिचित्तंधर्मि।उभयेपिव्यक्तावाभवन्तुनाभिव्यक्तावासर्वएवसर्वदैवगुणात्मानस्तत्त्वतःसत्त्वादिगुणत्रयस्वरूपाभवन्ति।यतःसुखदुःखमो

र हस्वरूपेणगुणत्रयेणसर्वासांबाह्याभ्यन्तरभेदभिन्नानांव्यक्तीनामन्वयोदृश्यते।यच्चयदन्वितंतत्तत्परिणामरूपंदृष्टं।यथाघटादयोमृदन्वितामृत्परिणामरूपादृष्टाः

।तथाचश्रुतिः।वाचारम्भणंविकारोनामधेयंमृत्तिकेत्येवसत्यमिति।१३।ननुयदितेत्रयोगुणाःपरिणामिनस्तत्कथंतत्परिणामएकोधर्मीस्यात्।परिणामिभेदस्यपरिणा

मभेदप्रसंजकत्वा [redacted] दनतिक्रमात्।ननुदुग्धादीनांपरिणामिनामेकःपरिणामोदृष्टः।तत्राह।परिणामैकत्वाद्वस्तुतत्त्वं।बहूनामप्यंगांगिभावेन

नौ२

© Dharmartha Trust J&K. Digitized by eGangotri

29 वर्त्तमानानामेकः परिणामो दृष्टः सभायां निक्षिप्तानां गवाश्वादीनां लवणापरिणामवत् महदादीनांत्वंगांगिभावाभावान्न तत्परिणामैक्यं गुणानांतु परिणामैक्यमंगांगिभावात्तद्य
थासत्वस्यांगित्वेन गुणत्रयादेकः प्रख्यरूपः परिणामः तमसो रजसोंगित्वेन कामादिरूपः परिणामः तमसोंगित्वेन च क्रोधरूपः परिणाम इति यथायथास्वं· एकस्मादेकः परि
णामः कथमुपपद्यत इति चेद् दैवैकस्य गुणत्रयात्मकत्वेनानेकत्वात् केवलं तत्परिणामावस्थायामंगांगिभावभेदस्य कल्पनात् ।१४। ननु क्षणिकविज्ञानात्मकचित्तातिरिक्तव
स्तुनास्त्येव· यत्स्मेयं तद्विज्ञानाभिन्नं विज्ञानवत् प्रमेयाघटादयस्तस्मात्तस्यैकत्वं नानात्वचिंता· चित्तमेव अनादिसमनंतरप्रत्ययात्मकवासनावैचित्र्यात् द्व्यगुणात्मनानाति· अ
न्यथात्वमद्भुतस्वयादीनामप्या मासमानमपारीरत्वं स्यादितिवदंतं वौद्धं प्रत्याह· वस्तुसाम्येपि चित्तभेदात्तयोर्विविक्तः पंथाः। तयोरिति विज्ञानात्मकस्य चित्तस्य वस्तु
नो घटादेश्च विविक्तो विभक्तो भिन्नः पंथा मार्गः स्वरूप[redacted]मितियावत् कुतः वस्तुसाम्येपि चित्तभेदात् समाने वस्तुन्युपलभ्यमाने नानाप्रमातृगणे चित्तस्य भे
दः सुखदुःखमोहरूपतयासमुपलभ्यते तथा ह्येकस्यां रूपलावण्यवत्यां योषित्युपलभ्यमानायां सरागस्य सुखमुत्पद्यते सपत्न्या द्वेषः परिव्राजकादे रु
पेक्षेत्येवमेकस्मिन्वस्तुनि नानाविधाश्चित्तोदया दृष्टाः सर्वेषां च यात्वयादृष्टाश्च मायापि दृष्टे सर्वाधिगमप्रसाधिज्ञानादेकं वस्तु· यद्येकं तदनेकेभ्यो भिन्नं· यथा
नीलरूपाच्चित्ताकारात्पीतरूपचित्ताकारात् एकं च योषिद्रूपं वस्तु स्वगोचरानेकचित्ताकारेभ्यो भिन्नं· यत्तु प्रमेयविज्ञानाभेदसाधकमनुमानमुपन्यस्तं तन्न· तथा
२९

© Dharmartha Trust J&K. Digitized by eGangotri

त्वेस्तनि विषयविषयिभावविरोधप्रसंगाद्बाह्यार्थाभावे विज्ञानानां नीलपीताद्याकारत्वायोगाच्च न च समनंतरप्रत्ययात्मकवासनानानात्वे तद्वैचित्र्यमिति वाच्यं नष्टस्याहेतुत्वात् तस्माद

स्तिविज्ञानातिरिक्तं वस्तु स्वप्नदृष्टस्य चास्य वस्तुप्रतिभासमात्रत्वादीश्वरेणैव जायते सत्यवासनानां तत्र हेतुत्वकल्पनात् [redacted] एतेन तत्त्वप्रमातृगतं तन्नाद्विज्ञानाकारे वस्तुनो भिन्न

भिन्नत्वमनेकदृष्टसमानाकारत्वप्रसंगत्व [redacted] स्तुव [redacted] दित्युपास्तं सोयमिति प्रत्यभिज्ञायाव त्वे

कस्य प्रागेवोपपादितत्वात् न चानेकदृष्टसमानाकारत्वेपि न तुल्यमिति वाच्यं न [redacted] स्य सजातीयविषयत्वेन गौणत्वात् [redacted] तथा ह्येकेन स्वप्नदृष्ट [redacted] वि

षयेऽपरं प्रतिकथितेसआ रु यस्त्वया दृष्टस्तत्समानो मयापि दृष्ट इति जायदवस्थायां यासुखजनकत्वेन कामुकदृष्टायोषित्सा मेवा हं दुःखजनकत्वेनापश्यामीति सपत्न्यु

नुभवो न तु न त्वसजातीया मित्सपी ति विरोधाद्वस्वैकसिद्धिरिति संक्षेपः ॥ ५ ॥ एवं विज्ञानवादिनि दृष्टिसृष्टिवादी प्रत्यवतिष्ठते अस्तु तावदेतो विज्ञानव्यतिरिक्तस्त द्विषयः स तु

उत्वाद्विज्ञानस्यापि सोनाज्ञातोस्तीति यावद्विज्ञानमवतिष्ठते किं तस्योत्पादकमिति चेद्ग्राहकविज्ञानरूपं चित्तमेव तस्य चानेकप्रमातृचित्ततंत्रत्वे उक्तदोषादेकैकप्रमातृचित्त

तंत्रत्वं न चैवमे [redacted] कप्रमातृचित्तस्यापि क्षणिकत्वाभ्युपगमात् स्वनेकत्वे प्रत्यभिज्ञाविरोध इति वाच्यं स्वगमद्वासनायावस्तुनः स्वप्नदर्वविज्ञानगतायाः सोय

निराकृते

© Dharmartha Trust J&K. Digitized by eGangotri

मित्यनादिवासनावशादुत्पन्नेन विज्ञानेन जन्यविषयेषूपसंक्रमादिति । अत्रोत्तरमाह । न चैकचित्ततंत्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥ एकस्मिन्वस्तुनि आयुक्तानेकचित्ततंत्र

तानिरोसमुच्चयार्थश्चकारः । यद्येकचित्तस्यैकविज्ञानस्यतंत्रं [redacted] अधीनं वस्तुकार्यं द्रव्यपदार्थ तदा तदप्रमाणकं तच्चित्ताभिमुख [redacted] मनः किं स्यात् वस्तुनाथाकल्पने प्रमा

णाभावाच्चित्तविनाशेऽपि स्वरूपेणैव तिष्ठत् । न तन्नादिकां किम [redacted] मित्यादि स्पर्शः ॥१६॥ नन्वेवं चित्तनदर्थयोर्भेदे सत्यपि कथंचिदेव चित्तेनार्थो गृह्यते सर्वस्य च किं निया

मकमत आह । तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातं ॥ चित्तस्य कालभेदेन वस्तु ज्ञातमज्ञातं च भवति । अर्थाकारेणाव्याप्तरागरूपं हि चित्तज्ञानसापेक्षत्वादर्थज्ञानताज्ञात

त्वयोर्हि स्पर्शः । न च सन्निकर्ष एवोपरागशब्दार्थः कथं नेष्यत इति वाच्यं । सन्निकर्षेऽपि नाक्षयादिदोषेण न दनवधारणात् ॥१७॥ चित्तस्य परिणामित्वं तदर्थभेदं च परीक्ष्य

चित्तपुरुषयोरपि भेदः संप्रति परीक्ष्यते । सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् । चित्तवृत्तिविषयाणामस्त्युक्तसंशयान्यथानुपपत्त्याज्ञाताज्ञातत्वं चित्त

स्य च परिणामित्वं । चित्तवृत्तीनां तु सदा ज्ञातत्वमेव न कदाचिदज्ञातता । नैवायं न वेत्यादिसंशयवच्चैत्र अहं जानामि न वेत्यादिज्ञाकारवृत्तिविषयकसंशयाभावात्तत्र

हेतुः । तत्प्रभोर्वस्तुपुरुषस्यानुरथाकारवृत्तिगतचित्प्रतिबिंबवतो वृत्तिसाक्षिणोऽपरिणामित्वात् । एतादृशस्य पुरुषस्यापरिणामात्वत्साकारतापाताभावात् । नहि वृत्तीनां विषयाका ३०

रव्यवसायैश्चैवायं न वेत्यादिसंशयो भवति ॥



© Dharmartha Trust J&K. Digitized by eGangotri

30

अतएव प्रत्यग्दृशिमात्रः पुरुषो पि भसयानुपरस्य प्रतिसंक्रमे पुरुषानः सर्वेषां चैत्याकारत्वमापन्नत्ये प्रतिभाव्यातं प्राकू॰ स च संबंधो ऽनिदिष्टतरव॰ चित्तस्य सात्विकत्वात्स्वच्छतमसत्त्वीनां नैर्मल्ये पि निर्मलतमत्वस्यैतेन स्वरूपं
प्रतिविंबायोगात् व्यापकत्वाच्च प्रतिमल्लस्य परिच्छिन्नस्य च तु स्वस्य निर्मलस्य मलिनो ऽभातिधिंबाहि दृष्ट[redacted]जलादिष्वप्रतिनिर्मलत्वस्यादित्यजलादौ [redacted] आपकस्याप्याकाशस्य दर्पणादौ च प्रतिविंब दर्शनाद् अक्तदोषद्वये

न तावद्व्यापकत्वाप्रतिविंबयोग्यत्वम् तथा विषयसंबंधमात्रं प्रतिबिंबसाक्षार्थः पुरुषस्य परिणामांगीकारे चवृत्तिगत संशयापात्तिः तत्कौवेंद्रमार्गः ॥१४॥ ननु चित्तमेव
स्वप्रकाशं स्वस्य साधर्म्यो भासकमस्तु किंतु पुरुषः साक्षिणेत्यत आह॰ न तत्स्वभासं दृश्यत्वात् रूपादिवदिति व ज्ञानाम्यहं सुखवानहं क्रुद्धो ऽस्मीत्यर्थे मे हृदयमित्यादिरूपतया दृ
श्यत्वात्तदृश्यत्वेनानुभवाच्चित्तं स्वभासं स्वप्रकाशं न भवतीत्यर्थः। अयंभावः। किमिदं स्वप्रकाशत्वं॰ न तावत्स्वाभिन्नप्रकाशक्रियाकर्मत्वं॰ क्रियाकर्मणोरेकत्वायोगात्॰ न हि ग
मनं गम्यते किंतु ग्रामः। नापि पुरुषवच्चित्तस्य स्वप्रकाशत्वा विषयत्वरूपं तत्॰ शांतं मे हृदयं क्रुद्धं मे हृदयमित्याद्यनुभवविषयत्वाद्दतो दृश्यत्वात्स्वातिरिक्तस्य द्रष्टुः कस्यचिद्दृश्यमि
ति सिद्धं ॥१९॥ हेत्वंतरं॰ एकसमये चोभयानवधारणं॰ चोहेतौ॰ न तत्स्वभासमित्यनुवर्त्तते॰ यत एकसमये उभयानवधारणमतस्तच्चित्तं स्वभासं न भवति॰ यदा हि निकलप
नेन तदात्मानं ग्रहीतुं प्रवृत्तो नि[redacted]दिसर्थः। न चोभयाद्वितीयक्षणे ग्राह्ये रक्तुर्गनो ऽनुपलब्धीयादिति वाच्यं॰ प्र
वृत्तिकर्मणं चित्तस्य व्यापाराभावेन द्वितीयक्षणे ग्राह्यता संभवात् ॥२०॥ ननु तथापि संततमेवत्वसाधनयः संतुनत्याह॰ चित्तांतरदृश्ये बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च॰ यदि हि चित्तं चित्ता
तरेणावसंततेरण्याग्राह्यं तत् तदा बुद्धिबुद्धेरनिष्टे नरातिप्रसंगो ऽनवस्थारूपो यो ऽर्थप्रतीतिः पुरुषायुषाप्यरूपया ऽरजः। न हि मतीतावप्रतीतो भवतिस्मृति संकरश्च प्रसज्यते ऽभ

आत्मनिबाह्यार्थेकल्पितप्रतिबिंबसंबंधोनातिरिक्तस्यादृश्यत्वात्

नरेण स्वप्रकाशत्वाभावं साधयति॰

© Dharmartha Trust J&K. Digitized by eGangotri

3

यं चैत्र इति ज्ञानिदभावं चेत्तज्ज्ञानाधानं तस्यस्तु अभावात्तज्जन्यस्मृतिकालेपि चैत्रवत्तज्ज्ञानधारापि स्मर्येत न न त्वेवं स्मर्यते तस्मात्संततेर्दृष्टा नित्यं स न तु तिस्त्रीकर्तुं मया शक्यमि
त्यर्थः। अनंतवृत्तिकल्पनापेक्षया सकलवृत्तिगोचरनित्यविभ्वेकचैतन्यकल्पने लाघवमिति भावः।२१। ननु कूटस्थस्य साक्षिणश्चितेर्न क्रियापूर्वकसंबंधाभावात्तेन
कथं बंधं कथं च तत्वेदने सार्वदिकत्वाभावोत आह। चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनं। यथा बुद्धेः क्रियया वस्तुसंबंधः प्रतिसंक्रमो क्रियापरिणामित्वा
त्तथा चितेः पुरुषस्य बुद्धौ प्रतिसंक्रमोऽपरिणामित्वात् किंतु सूर्यस्य जले प्रतिबिंबवत् व्यापकत्वात् पुरुषस्य ससांशत्वे प्रतिबिंबे सति [illegible] बुद्धिदाकारतापत्तौ स्वभोग्याया
वृत्तेः संवेदनं भवति चिच्छायाया आयतसंबंधेन बुद्धिरुपरक्ता चितिं चिद्रूपं वृत्तेः कादाचित्कत्वान्न तत्वेदनं सार्वदिकमित्यर्थः।२२। ननु यदि चित्तातिरिक्त आत्मास्ति तर्हि कथं के
षांचिच्चित्तमेवात्मेति भ्रमः स्यात् यतः चित्तस्य सर्वार्थग्रहणसामर्थ्यं तेषां भ्रमबीजमित्याह। द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं। एतावदिदं सर्वं यद् द्रष्टा पुरुषश्चेतनो दृश्यं ग्राह्य
चेतनमिति स सर्वोपि चेतनाचेतनप्रपंचोऽर्थो विषयो यस्य तत्सर्वार्थं। तत्र चेतनसान्निध्याच्चिद्रूपतामिव प्राप्तं द्रष्टृचिदुपरक्तं द्रष्टृ विषयं भवति इंद्रियादिद्वारा दृश्योप
रक्तं दृश्याकारं सदृष्ट विषयं भवति। तथा च भोग्यप्रछायाकारं सुखदुःखादिपरिणामलक्षणभोगात्मकं दृश्यमपि [illegible] चित्प्रतिबिंबा [illegible] तत्तादात्म्येन भानाच्चित्त २१

मेवात्मेतिमुच्यतेसौगतानांभ्रमः।जपाकुसुमाद्युपाधिकान्वयरक्ताभिज्ञानस्फटिकमणिकल्पस्यस्वप्नाकारत्वादित्वाच्चिन्मात्रस्यतद्रक्तिकोपाधौवाह्योनाल्पीतिचविज्ञानवादिनांभ्रम
ः।तत्रायंविवेकः।चित्तस्यभोग्यत्वात्तद्भोक्तान्यःस्वीकर्तव्यःसनित्योदिताचिच्छक्तिरित्युच्यते।द्विविधाहिचिच्छक्तिः।नित्योदिताअभिव्यंग्याचेति।तत्रनित्योदितायाःकूटस्थ
चिच्छक्तेःचित्तसत्त्वाभिव्यंग्याचित्प्रतिबिंबरूपासुखादिसारूप्यमापन्नाचिच्छक्तिर्भोगस्त्वसुच्यते।सभोगोऽपिद्विविधः।चिदवसानतारूपएकःपरिणामलक्षणोऽपरःत
त्राभिव्यंग्याचित्प्रतिबिंबरूपाचिच्छक्तिरुपरागःभुक्तपक्षस्यभोगः।अपरःसुखादि[redacted]परिणामोबुद्धेःआप्तचैतन्यायाइति॥२२॥क्षणिकविज्ञानमेवात्मचित्तमितिबौद्धमतेऽपिचित्ता
तिरिक्तआत्माप्रसाधितःयद्यपितत्स्फुरितंस्थिरचित्तानभ्युपगन्तृणामास्तिकानामनेऽपिचित्तादात्मनोभिन्नत्वेहेतुंदर्शयति।तदसंख्येयमवासनाभिश्चित्तम
पिपरार्थंसंहत्यकारित्वात्।यथापिण्डकृत्शयनगोवराघ्रविलवासनाभिश्चित्रितमपिचित्तंतिष्ठतिस्थितश्चित्तादिरूपपरार्थानभ्युपगमेवासनावशगाच्चित्तस्यस्वार्थ
त्वंसंभवतितथापितत्परार्थंमन्तव्यंकुतःसंहत्यकारित्वात्।[redacted]देहेन्द्रियमहंकाराणामिलित्वाभोगादिकार्यकारित्वात्।यन्मिलित्वाकार्यकारितत्परार्थंयथा[redacted]
शय्यासनाच्छादनादिचैत्रस्य।नहिशय्यादिस्वंस्वमात्मानंप्रतिकिंचिदुपकरोतिकिंतुचैत्रस्यैव।अतएवदेहेन्द्रियादीनामिवचित्तस्यापिपुरुषार्थत्वंमलकलत्वादरणान्नेतस

© Dharmartha Trust J&K. Digitized by eGangotri

वादैरगुणाव्यक्तरूपः। एवंचसंहत्यकारित्वलक्षणाद्धेतोश्चित्तस्यपरार्थत्वेसिद्धेचित्तातिरिक्तआत्मनोर्थासिद्धिः। व्याख्यातंचैतत्साधनपादेनदर्पणवद्दृश्यस्यात्मेतिसूत्रेण। २४।
चित्तदर्पणयोश्चित्तपुरुषयोर्भेदः पूर्वोक्तिद्द्रष्टानीशानस्यफलंकैवल्यंनिर्णेतुंद्वाभिःसूत्रैरुपक्रमते। विशेषदर्शिनआत्मभावनानिवृत्तिः। मात्मानमेयात्मकस्यास्यनिखिलप्रपंच
स्यतमायःपिंडवदेकीभावमापन्नस्यापियथोक्तप्रकारैरन्योन्यंविवेकदर्शिनोविवेकदर्शिनश्चित्तस्ययापूर्वंस्थिताआत्मभावनास्वस्वरूपजिज्ञासाकोहमासंकिंस्वरू
पोवातिष्ठामिकिंस्वरूपोवाभविष्यामीत्याद्याकारातस्याःशोकाद्यसंततानर्थहेतोर्निवृत्तिर्भवतीत्यर्थः। तथाचश्रुतिः। एतंहवावनतपतिकिमहंसाधुनाकरवंकिमहंपापमकर
वमित्यादिः [redacted] २५। ततःकिमतआह। तदाविवेकनिम्नंकैवल्यप्राग्भारंचित्तं। तदाविशेषदर्शनावस्थायांआत्मभावनानिवृत्त्याविक्षेपशून्यंचित्तंकैवल्यस्य
प्राग्भावःप्रारंभोयच्चतादृशंचित्तंविवेकेनिम्नंविवेकमार्गमनुगच्छन्नाज्ञानिष्ठंभवतीत्यर्थः। २६। ननुविवेकदर्शिनोप्यहंममेतिव्युत्थानप्रत्ययादृश्यंतेकुतस्तेभवंतीत्यतआह।
तच्छिद्रेषुप्रत्ययांतराणिसंस्कारेभ्यः। कोमलकंटकन्यायेनविशेषदर्शनेजातेपिप्रसंख्यानछिद्रेष्वभिव्यक्तेभ्यःप्रत्ययांतराणि[illegible]नरूपाणिनवं[illegible]सर्गः आवरणे
क्षिनिवारेणतेषांहानंकर्तव्यमित्युक्तंभवति। २७। कथंतेषांहानोपायइत्यतआह। हानमेषांक्लेशवदुक्तं। अविद्यादयःक्लेशाःक्रियायोगेनतनूकृताःप्रसंख्यानदहनेनदग्धप्रस

32



© Dharmartha Trust J&K. Digitized by eGangotri

राः प्रसंख्यानदहनदग्धाः पुनश्चित्ते संस्कारं न प्रसुवते एवंभुता न संस्कारा अपि विवेकख्यातिपरिपाकदशायां प्रत्ययांतराणि कुर्वाणाः परिपक्वप्रसंख्यानदहनदग्धा
त्मबीजभावा प्रसवधर्माणो भवंतीति क्लेशवदेतेषां हानमुक्तं वेदितव्यं ॥२८॥ एवं प्रत्ययांतरानुदयेन स्थिरीकृते समाधौ यादृशस्य योगिनः समाधेः प्रकर्षप्राप्तिर्भवति
तादृशमुपायमाह । प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः । प्रसंख्यानं यावतां तत्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरू
पस्य विभावनं विवेकसाक्षात्कारस्तत्रापि यो ऽकुसीदो वार्धुषिकवत्सर्वभावाधिष्ठातृत्वरूपां सिद्धिं न प्रार्थयते तस्य योगविघ्नाभावेन सर्वप्रकारं विवेकख्यातेः
परिशेषाद्धर्ममेघनाम्नी संप्रज्ञातस्य प्रयापराकाष्ठा [redacted] स समाधिर्भवतीत्यर्थः । प्रकृष्टमशुक्लकृष्णं धर्मं परमपुरुषार्थलक्षणं मेहति सिंचतीति धर्ममे
घः ॥२९॥ ततः किमत आह । ततः क्लेशकर्मनिवृत्तिः । ततो धर्ममेघसमाधेर्दृष्टादृष्टद्वारा क्लेशकर्माणि कदापि नोत्सह्यंते इत्यर्थः । क्लेशा अविद्यादयः पंच । कर्म शुक्ला
दिभेदात्त्रिविधं तज्जन्यमदृष्टं च ॥३०॥ निवृत्तेषु तेषु किं भवतीत्यत आह । तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्याज्ज्ञेयमल्पं । तदा क्लेशकर्मनिवृत्तौ सर्वे सावर
णमलेनावरजस्तमोरूपेणापेतस्य ज्ञानस्य सत्वप्रकाशस्यानंत्याद्विभुत्वाद्व्यापकत्वाज्ज्ञेयं तत्प्रकाश्यमल्पं भवति । यदिहि पंचविंशतितत्वातिरिक्तं वस्तुस्या

© Dharmartha Trust J&K. Digitized by eGangotri

33

छेत्तस्यात् दीपप्रकाश्ये नं ज्ञेयस्यैवाल्पत्वात् अनन्तप्रकाशे तेन सत्त्वस्यात्मन ये इत्यर्थः ॥३१॥ ततः किमित्यत आह ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानां ॥ तेनोज्ञा
नानंत्यात्मकवैराग्येण कृतो निष्पादितो भोगापवर्गलक्षणः पुरुषार्थो यैस्ते कृतार्था गुणाः सत्वरजस्तमोरूपास्तेषां परिणाम आनुकूल्यार्थसमाप्तेरानुलोम्येन भा
विलोम्येन वांगांगिभावात्मकः स्थितिलक्षणस्तस्य योऽसौ क्रमो वक्ष्यमाणस्तस्य समाप्तिर्निष्ठा न पुनरुद्भव इत्यर्थः ॥३२॥ क्रमस्योक्तलक्षणस्य लक्षणमाह ॥ क्षणप्रतियोगी
परिणामापरान्तनिर्ग्राह्यः क्रमः ॥ क्षणोऽल्पीयान्कालस्तस्य प्रतियोगी विरोधी एकेनापि क्षणेनानंतरितः अविरलाधारेति यावत्स क्रमश्च मंतव्यः ॥ न च प्रमाणमाह प
रिणामापरान्तनिर्ग्राह्य इति [illegible] सुरक्षितेन वीने
वस्त्रे पुराणतादर्शनेन नवीनतयारभ्य क्षणे क्षणे पुराणतायाः सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलस्थूलतरस्थूलतमत्वेन जायमानायाभेदक्रमोऽपरान्तेन न
वीनत्वादपरस्य पुराणावस्थान्तेन स्थूलतमचरमपुराणत्वेन ग्राह्योऽनुमेयः पूर्वपूर्वपुराणतानामंतरेण चरमपुराणतायाः असंभवादित्यर्थः ॥३३॥ इदानीमाप्तक्रम
तिपाद्य योगस्य फलं कैवल्यं स्वरूपमाह पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति ॥ कृतभोगापवर्गाणां तनतन्तनया सुधादिगुणा
स

३३

णांपुरुषोपकरणलिंगमात्रीयात्मकानांयःप्रतिप्रसवःस्वकारणेऽत्यंतविलयस्तस्मिन्सतेःकैवल्यं·यातुधर्म्यभेदाचितिशक्तिःस्वरूपिणीस्वरूपप्रतिष्ठाबुद्धिसत्वोपाधिक
रूपापन्नामर्षात्त्वजपापायेस्फटिकस्वरूपप्रतिष्ठावत्पुरुषस्यकैवल्यं·वाशब्दश्चार्थे·परस्परवियोगेप्रकृतिपुरुषयोरपिकेवलत्वेनैकाकिताभवति·इतिश
ब्दःशास्त्रपरिसमाप्तौ·३४॥ ॥नमामिपरमानंदंविश्वेशंयेनमेहृदि·प्रवर्त्तितेयंकल्याणीवाणीसूत्रानुसारिणी·१सतांसंतापहारिण्यःसंतुपातंजलाःकृतयः।
34 कलानिधेर्विवेकलाःसकलानंदहेतवः।२।पतंजलिःसूत्रकारोयस्मिन्व्यासश्चभाष्यकृत्वृत्तिकारोमहाराजःकोऽन्योयांस्तत्रमेश्रमः।३।तथापिस्वांतसं
शुद्ध्यैसुलभप्रलचापलःवृत्तीरनेकादृष्ट्वास्मिप्रवृत्तोमाहसंग्रहे४॥ ॥इतिमहायाज्ञिकगंगाधरपाठककुलोत्पन्नसततलाग्निहोत्रयाजिशिवशंकरसू
नुनोदयशंकरेणकृतेयोगवृत्तिसंग्रहेकैवल्यपादश्चतुर्थःसमाप्तश्चाध्यायःशास्त्रंच॥ सं०१८४०फा०व०२रवौलि०प्रयागक्षेत्रे·



© Dharmartha Trust J&K. Digitized by eGangotri

खि३ा:
४५

# योगशास्त्र

ओं ४६

पुस्तकमिदं पाठकोपाख्यरामचंद्रस्य
योगसूत्रवृत्तिः पत्राणि ३४॥

१९७

३५

कुं उत्कीर्णतत्त्वकुं डाल न सदृश तन
कुर्वंतं ॥ महात्म सावित्र सितं हेरंबं स
मुपास्महे ॥ १॥ वाक्प्रलक्षालकेनंकु
र्वाणा चांद्रेत्यर्थसंग्रहम् । चेतः शु
ध्येत्पुनः कुर्वे योगवृत्त्यर्थसंग्रहं २

३८

© Dharmartha Trust J&K. Digitized by eGangotri